SŪRĀCĀRYA'S

# DĀNĀDIPRAKARAṆA

L. D. SERIES 90

GENERAL EDITORS
DALSUKH MALVANIA
NAGIN J. SHAH

*Edited By*
Pt. AMRUTLAL M. BHOJAK
NAGIN J. SHAH

L. D. INSTITUTE OF INDOLOGY AHMEDABAD-9

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

SŪRĀCĀRYA'S

# DĀNĀDIPRAKARAṆA

L. D. SERIES 90

GENERAL EDITORS
DALSUKH MALVANIA
NAGIN J. SHAH

*Edited By*
Pt. AMRUTLAL M. BHOJAK
NAGIN J. SHAH

L. D. INSTITUTE OF INDOLOGY AHMEDABAD-9

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

*Printed by*
Shri Ramanand Printing Press
Kankaria Road,
Ahmedabad–22,
and Published by
**Nagin J. Shah**
*Director*
L. D. Institute of Indology
Ahmedabad–9

FIRST EDITION

January 1983

~~PRICE RUPEES 9/-~~

Rs 20

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सूराचार्यविरचित

# दानादिप्रकरण

संपादक
पं. अमृतलाल मो. भोजक
नगीन जी. शाह

प्रकाशक :
लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर अहमदाबाद-९

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## PREFACE

The L. D. Institute of Indology has great pleasure in publishing the *Dānādiprakaraṇa* of Sūrācārya (11th Century V. S.), a pupil of Droṇācārya. The work is divided into seven 'avasaras' and contains in all 537 Sanskrit verses composed in varied metres. It, as its title suggests, mainly deals with *jñānadāna, abhayadāna, annadāna* and *dhanadāna* (for the construction and protection of Jaina temples, for the installation of Jina images and for the multiplication and preservation of manuscripts).

The work was first printed in our Journal SAMBODHI Volume VIII. Now it is here being published separately in book-form, adding Introduction and Index of verses. It is hoped that the publication of this work will be of considerable value and interest to students of Indian Religions in general and Jaina Religion in particular.

L. D. Institute of Indology
Ahmedabad-380 009
22nd December 1982

**Nagin J. Shah**
Director

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

# INTRODUCTION

## 1. Critical Apparatus

The only extant manuscript of the *Dānādiprakaraṇa* composed by Sūrācārya belongs to the Sanghavi Pāḍā Jaina Jñāna Bhaṇḍāra, Patan. This Bhaṇḍāra is now preserved in the Hemacandrācārya Jaina Jñāna Mandir, Patan. The manuscript is incomplete. Now it has 72 folios. The first three folios are missing. Folios 4–6, 8, 15, 23, 25, 39, 74, 75 are mutilated. Hence some syllables are lost to us. These missing syllables of the verses are indicated by hyphens (–). The Ms., as we have it, has no colophon. In the Catalogue entitled '*Paṭṭanastha Prācya Jain Bhāṇḍāgārīya Grantha Sūci*' published by the Oriental Institute, Baroda, this ms. is numbered 307(7); see page 185. In the new list it is numbered 205(7). The ms. is not dated. But on the basis of the characteristics of the script it can be assigned to the 12th Century V. S. Nearly forty years ago Pt. Amrutlal M. Bhojak prepared the press-copy on the basis of this ms. The Late Āgama-Prabhākara Munirāja Shrī Punyavijayaji went through this press-copy. And on the basis of this press-copy we have edited the text printed here.

## 2. Date and Importance of the Work

It is mentioned in the Bṛahaṭṭipanikā that Sūrācarya composed his *Nemicaritamahākāvya* in 1090 V. S. Hence we can safely put the composition of the Dānādiprakaraṇa in the last two decades of the 11th century V. S. This period is marked by a kind of revolution in the Śvetāmbara tradition. There had existed before 11th century V. S. practice of caityavāsa by monks in the Śvetāmbara tradition for several centuries. Finding the rules of conduct prescribed in the Āgamas very hard for them, the caityavāsin monks acknowledged their limitations and followed moderate course of conduct. But gradually it became difficult to distinguish between moderation and laxity. Hence, as a reaction to this, there arose in the 11th century V. S. a group of Jaina Śvetāmbara monks who disapproved of caityavāsa practices and advocated strict adherence to the code of conduct laid down in the Āgamas. They campaigned against the laxity prevalent among the caityavāsin monks.

Of course, tradition of pure renunciation, true non-attachment and study of all śāstras - Jaina as well as non-Jaina - was maintained and continued through centuries by caityavāsī monks. Much has been written on this topic. The caityavāsī monks did not follow strictly the code of mon-

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

astic conduct prescribed in the Jaina Agamas. As and when occasion demanded they adopted a course that had no sanction in the Āgamas. Gradually laxity crept into the caityavāsa. So there arose strong opposition to this institution of caityavāsa that had produced great learned dignitaries and great practisers of penance. Again, it was caityavāsin monks who had preserved the tradition of the meaning of the Āgamasūtras.

As the first three folios of the present work are lost to us, the benediction, the scope of the work, etc. are not available to us. Yet the work at many places logically defends the caityavāsa institution against the opposition, showing the propriety from various standpoints. Some verses in defence of caityavāsa are found in avasaras VI and VII (VI. 13-16, 19, 32-34, 40-46, 50-53; VII. 109, 112).

The above verses are in support of the caityavāsa. But at the same time, the work praises and holds in high esteem the monks who strictly follow the code of monastic conduct, prescribed in the Jaina Āgamas. (Avasara VI 75-107).

It is unwholesome and false preaching to run down the practice of charity. Those who do so are described in derogatory terms (Avasara VII 1-2, 26-27). This suggests that even in the days of our author there were some religious leaders who preached that the practice of charity (*dāna*) was not worthy of being followed.

The view that worship of images of Deva involves violence is refuted in Avasara VII 31-32. This means that in those days there were persons who did not favour idol-worship. At that time Jaina images were adorned with ornaments, viz. crown, tilaka, ear-ornaments (*kuṇḍala*), necklace, a pair of bracelets (*valaya*), armlets (*aṅgada*) and chest-ornament (*śrīvatsa*). (Avasara IV vv 39-47).

It is well known that in the past the people and the State donated villages, fields etc. for the maintenance of a Śiva temple, etc. Similarly, the practice of donating villages, fields, orchards with step-wells, dwelling places, shops, etc. for the maintenance of Jaina temple was in vogue in those days (Avasara VII 39).

Moreover, charity in respect of Jñāna, abhaya, construction of Jaina temples, installation of Jaina images, etc. is also dealt with.

There occurs a reference to Vācaka Umāsvāti at two places (Avasara II 14 and Avasara VII 87). After verse 87 of Avasara VII, āryās from the *Praśamarati* are quoted in support of the view under consideration.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Again, the author has borrowed one verse from the *Bhagavadgītā* (Avasara II. 12). Many a statement occurring in the work may be viewed as Sanskrit rendering of the Āgamic sentences.

### 3. Author

Bhīmadeva, a Caulukya King of Gujarat, had two maternal uncles. One who became a Jaina monk was Droṇācārya, and another was Saṅgrāmasiṁha. On the death of Saṅgrāmasiṁha his wife approached and requested Droṇācārya to teach her son Mahīpāla various Śāstras. So, Droṇācārya taught him Grammar, Logic, Literature and Āgamas. After completing his studies Mahīpāla too became a Jaina monk as his uncle had great affection for hin. Mahīpāla accepted Droṇācārya as his spiritual guru. Droṇācārya conferred on him the title of Ācārya and named him Sūrācārya.

One day there arrived in the court of Bhīmadeva important persons from the court of Bhojadeva, a king of Dhārā. They recited a gāthā describing the marvellous qualities of king Bhoja. In reply to it Sūrācārya composed a gāthā and Bhīmadeva sent it to Bhoja who on reading it was greatly impressed.

Sūrācārya was a hard task master. He could not tolerate even minor lapses on the part of his spiritual disciples, and hence used to give them physical punishments. His disciples related their painful experiences to Droṇācārya who strongly disapproved of Sūrācārya's method. But Sūrācārya humbly submitted that in giving them physical punishment his only intention was to make them scholars so thorough that they could easily win the opponents in other States. At that very moment Droṇācārya asked him if he could win the opponents in the court of Bhojadeva. He accepted the challenge and took an oath that he would not use ghee and milk in his diet so long as he did not win over the learned Assembly of Bhojadeva. He reported to Bhojadeva his arrival in Dhārā. He impressed Bhoja with his learning. But Bhoja never wanted that there should be persons in the court of any other king more learned than those in his own court. So, it was certain that Bjoja would not let him go alive. Fortunately he could escape and save himself with the help of Dhanapāla. He went straight to Droṇcārāya in Patan. For details readers are requested to refer to the Prabhāvakacarita (V. S. 1334) by Prabhācandra, published in the Singhi Jaina Series, No. 13 pp 152–160, Bombay.

In the *Bṛhaṭṭippanikā* Sūrācārya's three works are listed and noted. They are as follows:

(1) A commentary (*Vṛtti*) on *Vīrastava* composed by the poet Dhanapāla Extent 225 Ślokas.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(2) (a) Nemicarita-mahākāvya.

"श्रीनेमिचरित्रं महाकाव्यं संस्कृतं गद्यपद्यमयं बहुखंडितं १०९० वर्षे श्रीभोजराजराज्ये सूराचार्यकृतम्"

Jaina Sāhitya Saṁśodhaka Vol. I, No. 2, p. 13 (*Bṛhaṭṭippanikā* Granthakramāṅka 510). The Prabhāvakacarita (p. 160 v. 254) refers to this work and writes : युगादिनाथश्रीनेमिचरितादभुतकीर्तनात् । इतिवृत्तं द्विसन्धानं व्यधात् स कविशेखरः ।

It is noteworthy that the ms. of this work, available to the author of the *Bṛhaṭṭipanikā* was mutilated. It seems it was a doublemeaning mahākavya.

(b) Nemimahākāvyaṭippanaka - extent 1400 Ślokas. (*Bṛhaṭṭippanikā* No. 511)

(3) Dānādiprakaraṇa

"दानादिप्रकरणं सं. सूराचार्यकृतं समावसरं काव्यादिबन्धं पत्र ३४"

–*Bṛhaṭṭippanikā.*

Out of these three works, 'Dānādiprakaraṇa' only is available to us and that too in one ms. only.

**4. Brief Substance :**

It is notworthy that this work has the literary division 'Avasara'. Very few works having this division has come down to us. It has in all seven Avasaras. We give below the avasara-wise contents.

Avasara I expounds the importance of Dharma and good actions which cause worldly and otherworldly happiness and finally lead to even Liberation.

Avasara II extensively deals with charity in respect of *Jñāna* and emphatically pronounces that this charity is superior to all other charity. Knowledge of what is *heya* (things to be avoided) and what is *upādeya* (things to be accepted) is essential and basic for the spiritual progress. Knowledge purifies mind, speech and body, and leads to non-attachment. Hence the importance of the words of Jina, embodying knowledge, is stressed; mode of acquiring knowledge from the spiritual teacher is explained; importance of the teacher is pointed out; venerableness of the learned is emphasised; exhortation for acquiring knowledge is made; benefits of knowledge are recounted; thirst for knowledge is praised, futility of the life of man devoid of knowledge is demonstrated; and glory of Jñana is sung.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Avasara III discusses charity in respect of fearlessness (*abhayadāna*). Hence it classifies living beings, recognises the desire-to-live in all living beings, enumerates bad consequences of violence, advises to cultivate compassion for all living beings, contains a sermon on compassion and points out good consequences of the deeds inspired by compassion.

Avasara IV is devoted to the exposition of charity in respect of food (*annadāna*), construction of Jina temples, installation of Jina images, book copying, etc. Importance of giving food to the needy is stressed and various good consequences of this act are pointed out. It is said that money liberally expended on building temples, installing Jina images, fecilitating fourfold religious order and copying and preserving books liberates one from the cycle of birth and death. It exhorts one to construct Jina temples, glorfies the act and enumerates fruits one enjoys as a result of it. The acts of getting Jina images carved out and installed are praised and their fruits are mentoned. Worship of Jina images with ornaments, water, sandle-paste, etc. is lauded. Importance and good consequences of Rathayātrā are also dealt with. At one place necessity of inner purity is stressed.

Avasara V describes the nature of Āgamas preached by one devoid of attachment (*vītarāga*) as also the nature of one who is free from all defilements, viz. ignorance, attachment, etc. It refutes the Mīmāṁsaka view that Vedas are authorless. It points out the importance of the words of Jina, as also of copying and preserving Jināgamas. It deals with ***ane-****kāntavāda* (doctrine of non-onesidedness), truth, karma theory etc. It is noteworthy that it refutes the view that Logic, Grammar, etc. (what we normally call secular sciences) are not *dharmaśātras*. The author wants his fellow monks not to neglect the study of these sciences, under the wrong impression that they are *śāstras* having no connection whatsoever with *Dharma* (Religion). Again, he advocates the study and preservation of non-Jaina works also.

Avasara VI relates the greatness of Jaina order, points out the fruits of the worshipping the same, declares loftiness of Jaina monks, advocates indifference towards the monks of loose character, enumerates defects of the view of those who discriminate between monks, calling some deserving and others otherwise, preaches compassion for coreligionists, points out the defects of *parigraha*, praises Jaina monks who have renounced *parigraha*, advises to look after the needs of monks and exhorts to give food etc. in charity to the poor and miserable.

Avasara VII reproves those who are against charity, refutes the view that as worship of Jina involves violence it should not be practised,

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

reveals the good that results from the worship of Jina, supports religious activities even though they involve *ārambha*, etc, and stresses the importance of devotion to Jaina monks.

## 5. Acknowledgement

Though the manuscript is corrupt we have tried to make the text as flawless as possible. We are especially grateful to Late Āgama-Prabhākara Muniraja Shri Punyavijayaji who generously gave us the copy which he had got prepared on the basis of the ms. already mentioned.

2 October, 1982

Amrutlal M. Bhojak
Nagin J. Shah.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

श्रीमत्सूराचार्यविरचितं

# दानादिप्रकरणम्

## प्रथमोऽवसरः

[४-१][1] - - - - - - - - - - यतालोदं (?) जातिरमला
सुरूपं सौभाग्यं ललितललना भोग्यकमला ।
चिरायुस्तारुण्यं बलमविकलं - - - - - -
- - - - - - - - - - - - - - - - पेत इदम् ॥१७॥

भुवनतिलककल्पे यत् कुले केऽप्यनल्पे ।
त्रिभुवनजनवन्द्ये प्राणभाजोऽनवद्ये ।
धनकनकम - - - - - - - - - - -
- - - - - - - - - - - - कल्पद्रुमस्य ॥१८॥

विदन्ति न हि वेदनां गदमुद्भवामाकुलाः
कुलीनपुरुषा इवापरपुरन्ध्रिजातां रतिम् ।
यद - - - - - - - - - - - - - - तर्जितं
- - - - - - - - - - विमलधर्मविस्फुर्जितम् ॥१९॥

यज्जायन्ते जन्तवो जातु जातौ
संशुद्धायां सिद्धसिद्धाविवोच्चैः ।
- - - - - - - - - - - - -
- - - - - - - - - - - - - - ॥२०॥

[४-२] अदर्पः कन्दर्पो रहयति रतिं नातिभयतो
निकामं कामिन्यः कमपि कमनीयं च कमितुम् ।
- - - - - - - - - - - - - - - - - - - -
- - - - - - - स्फुरितमवसेयं स्फुटमहो ॥२१॥

शृङ्गारस्येव भृङ्गारो लीलागारं रतेरिव ।
सुखानामिव सत्खानिः सुम - - - - - - - ॥२२॥
- - - - - - - - - - - - - - स्येव वर्तिनी ।
क्रीडाधामेव धर्मस्य निर्माणमिव नर्मणाम् ॥२३॥

---

१. पत्रत्रयं नोपलभ्यते ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[५-१] ललना लोक्यते लोके यल्लोचनमहोत्सवः ।
— - — — — — — — — कल्पितं तदकल्पितम् ॥२४॥
सौभाग्यं गुरुभागधेयसुभगाभोग्यं सुभोगाञ्चितं
देवाराधनतद्धनेन(?तत्परेण) मनसा सर्वो - — — — — ।
— — — — — — — — — — — ललनालीलाकलापोचितं
तद् धर्मस्य विचक्षणा विलसितं व्याचक्षते निश्चितम् ॥२५॥
— — — — — — — — — — — — — — — — — ।
— — — स्यात् कुलीनं च कलत्रं कुशलैर्नृणाम् ॥२६॥
लज्जालङ्कारसारं मधुमधुरवचोन्यासमज्ञातहासं
प्रत्यु — — — — — — — — — — — — — — — — — — — — ।
भक्तं नित्यानुरक्तं प्रगुणगुणगणाखण्डसन्मण्डनं स्यात्
पुण्यैः पुंसोऽनुकूलं नकलितकलहं सत्कलत्रं कलत्रं ॥२७॥
— — — — — — — — — — — — — — — — — — ।
[५-२] अल्पजल्पान्यहासानि कलत्राणि सधर्मणाम् ॥२८॥
राज्याभिषेककलशाविव मन्मथस्य
पीनौ स्तनौ घनतरौ तरुणा — — — ।
— — — - — — — — — — — — — सन्ती
पुंसः कलासु कुशलाकुशलैः कलत्रम् ॥२९॥
प्रीतेरप्यप्रीतिं कुर्वाणाः प्रीणयन्ति नेत्राणि ।
रूपेण करण — — — — — — — — — — — — — ॥३०॥
यद्भीतितो हरिमनङ्गमनङ्गशत्रुं
लक्ष्मी रतिर्गिरिसुता सततं त्यजन्ति ।
नो वल्लभं कलभकुम्भ — — — — —
[६-१] ता वल्लभा शुभवशेन नरोऽनुरक्ताः ॥३१॥
नाभुक्ते वल्लभे भुङ्क्ते शेते नाशयिते[1] शुचिः ।
चित्तानुवर्तिनी पुण्यैर्वर्तनी निर्वृतेः प्रिया ॥३२॥
ऐकवित्तेव[2] वित्तेषु विनीता नीतिकोविदा ।
निर्मदा प्रमदा पुण्यैः पुंसः स्यात् सम्मदास्पदम् ॥३३॥

१. नाशयिते—असुप्ते । २. अपूर्वलक्ष्मीरिव ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भोग्या योग्या साधुबन्धूपयोग्या
लोके श्लाघ्या श्लोकधर्मैकहेतुः
जाये – – जायते पुण्यभाजां
श्रीः कुर्वाणा निर्वृतिं निर्विवादा ॥३४॥

स्वपरोपकारनिपुणाः पुरुषार्थपरायणाश्चिरं सुखिनः ।
जीवन्ति स्पृहणोयं धर्मेण नराः सुधर्माणः ॥३५॥

सत्तारुण्यं तारलावण्यपुण्यं
पीयूषं वा नेत्रपात्रप्रपेयं ।
श्रीपुंसानां कामदेवैकधाम
प्राज्ञाः प्राहुर्धर्मबीजप्ररोहं ॥३६॥

– – – – – – – [६-२] रिपुबलमखिलं खेलया खण्डयन्ति
प्रोदण्डैर्मुण्डखण्डैरिह रणधरणीमण्डलं मण्डयन्ति ।
पादाङ्गुष्ठस्य कोटचा यदतुलमचलं लीलया चालयन्ति
धर्मस्या[चिन्त्यश]केस्तदपि विलसितं साधवः साधयन्ते ॥३७॥

कैलासः किल रावणेन तुलितो बाहुद्वयेनाचलः
श्रीगोवर्धनभूधरो मुरजिता[1] तूर्णं च तीर्णोऽर्णवः ।
चक्री बाहुबलेन बाहुबलिना भग्नो विलग्ने रणे
किं नो निर्मलधर्मनिर्मितिरियं निर्मापयत्यद्भुतम् ॥३८॥

द्वात्रिंशत्सत्सहस्रैः[1] सविनयविनतैः सेवितो भूपतीनां
द्विस्तावद्भिः सुरस्त्रीविसरविजयिनां कान्तकान्ताजनानाम् ।
रत्नैर्द्विःसप्तसङ्ख्यैरनिधनसुधनैः[2] सान्निधानैर्निधानै-
र्मर्त्यानां मूर्धवर्ती मणिरिव सुकृती वर्तते [७-१] चक्रवर्ती ॥३९॥

पूर्वार्जितोर्जितशुभेन भवन्ति भूपाः
श्वेतातपत्रचमरादिविचित्रचिह्नाः ।
सामन्तसन्ततिसमानतपादपद्मा
देवा इवातिरुचिरा स्फुरितोरुपद्माः[3] ॥४०॥

---

१. कृष्णेन ॥ १. चतुःषष्टिसहस्रैरित्यर्थः ॥ २. चतुर्दशभिः ॥ ३. स्फुरितप्रौढलक्ष्म्यः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्येऽप्यदृश्यसादृश्या दृश्यन्ते हरिणीदृशाम् ।
हरन्तो हृदयं हृद्याः पुण्यैः प्राप्ताः परं पदम् ॥४१॥

जगज्जनितविस्मयं त्रिभुवनाधिपत्यं परं
तृणीकृतपदान्तरं निरुपमं जिनानां पदम् ।
विशालशुभशालिनोऽसुलभने(मे)कमुच्चैस्तरां
स्फुरत्यखिलमुज्ज्वलं फलमफल्गुवल्गुस्फुटम् ॥४२॥

रात्रिंदिवं नृदिवधामनि भूरिधामा
धर्मेण निर्मलसुखं सुरनायकोऽपि ।
भुङ्क्ते नमत्त्रिदशकोटिकिरीटकोटि–
सङ्घट्टघृष्टचरणो रुचिरं चिराय ॥४३॥

ईर्ष्याविषाद[विष][ ७–२]मैर्विषयाभिलाष–
सम्भावदुःखनिवहैर्निखिलैर्विमुक्ताः ।
मुक्ता इवातिसुखिनः सुचिरं वसन्ति
सर्वार्थसिद्धसुरधामनि धर्मतोऽन्ये ॥४४॥

प्रत्यक्ष – – – – – मुज्ज्वलमिदं चन्द्रस्य भद्रङ्करं
सान्द्रप्रद्रुतचन्द्रिकामृतरसप्रक्षालितक्ष्मातलम् ।
लोकालोकनलोचनोत्सवकरं मार्तण्डसन्मण्डलं
तेजोमण्डितभूमिमण्डलमिदं पुण्यैस्तदप्याप्यते ॥४५॥

जरामरणवर्जितं शिवपदं यदप्यूर्जितं
निरन्तरसुखाञ्चितं निरुपमं रुजा वञ्चितम् ।
अनन्तमतिदुर्लभं शुभविवेकिनां वल्लभं
सम[ ८–१]स्तहतकर्मतस्तदधिगम्यते धर्मतः ॥४६॥

॥प्रथमोऽवसरोऽवसितः॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## द्वितीयोऽवसरः

धर्मस्य निर्मलधियामथ साधनानि
सद्दानशीलसुतपांसि सभावनानि ।
श्रीमज्जिनोऽभ्यधित(?) विश्वजनीनवाक्यः
कस्यापि साधनविधिः किल कोऽपि शक्यः ॥१॥

ज्ञानस्याद्यं दानमत्रानिदानं
दातुर्लातुर्धर्मसिद्धेर्निदानम् ।
— — — न्यत् स्यात् सुखानां निधानं
तेनैवादावुक्तमेतत् प्रधानम् ॥२॥

अभयान्ना[ ८–२ ]दिभ्यां(?) तु प्रवर्तननिवर्तनेन मर्त्यानाम ।
अर्थेऽनर्थे च यथा ज्ञाता तेनोत्तमं ज्ञानम् ॥३॥

सर्वपुरुषार्थसिद्धेर्निबन्धनं धीधना वदन्तीदम् ।
तेन ज्ञानं ददता दत्ताः [सर्वेऽ]पि पुरुषार्थाः ॥४॥

अन्यच्च धर्ममूलं करुणा सा ज्ञानकारणा सिद्धा ।
सिद्धान्तेऽपि प्रथितं प्रथमं ज्ञानं ततः करुणा ॥५॥

धर्मेण चाखिलसुखानि समीहितानि
मर्त्यामरेषु मनुजो लभते हितानि ।
धर्मः [ ९–१ ] समस्तसुखसिद्धिनिमित्तमुक्तः
सर्वेण वादिनिवहेन विना विवादम् ॥६॥

तद्धर्मसाधनमिदं ददताखिलानि
सौख्यानि धर्मजनितानि समर्पितानि ।
वित्तं [पुन]र्वितरता वनितारतादि–
वस्तूनि वित्तसुलभानि विलोभनानि ॥७॥

लोकेऽपि रूपके दत्ते प्रदत्तं भोजनं जनः ।
हेतौ कार्योपचारेण निर्विचारं वदत्यदः ॥८॥

लोकद्वयेऽभिलषता विपुलोपकारं
दातव्यमेतदनिशं करुणापरेण ।
ज्ञानात् परं न परमस्ति परोपकार-
सम्पादनं सपदि सम्पदमादधानम् ॥९॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञेयं ज्ञात्वा ज्ञानतो ज्ञानवन्तो
हेयं हित्वा पूजनीया जनानाम् ।
सञ्जायन्तेऽत्रैव जन्मन्यजस्रं
पापस्रंसादन्यजन्मन्यवश्यम् ॥१०॥

कल्याणकलापकारणं ज्ञानं सर्वविपत्तितारणम् ।
[९-२] मिथ्यात्वादिविरोधिबाधनं सिद्धेः सिद्धं साधु साधनम् ॥११॥

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुते क्षणात् ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥१२॥ [भगवद्गीता ४.३७]१

अज्ञानो यत् कर्म क्षपयति बहुवर्षकोटिभिः प्राणो ।
तज्ज्ञानी गुप्तात्मा क्षपयत्युच्छ्वासमात्रेण ॥१३॥

वाचकमुख्योऽप्याख्यत्सज्ज्ञानादीनि मुक्तिमार्ग इति ।
न च मार्गणीयमपरं परमस्ति महात्मनां मुक्तेः ॥१४॥

यो दिशति मुक्तिमार्गं परोपकारी ततोऽपरो न परः ।
परमपदानन्दादिव भवभवनसमुद्भवान्नन्दः ॥१५॥

समीहमानैः स्वपरोपकारं
ज्ञानं सदा देयमचिन्तयद्भिः ।
परिश्रमं श्रीश्रमणैः स्वकीयं
कृत्यान्तरं वा सुतरामतन्द्रैः ॥१६॥

नास्मिंश्चित्तं चरति सुचिरं चिन्तनीयान्तरेषु
प्रायः [कायः प्र][१०-१]चयति न वा दुष्टचेष्टामनिष्टाम्
व्यग्रं वक्रं वदति न परं येन सावद्यजातं
धर्मादानं तदिदमुदितं ज्ञानदानं प्रधानम् ॥१७॥

ज्ञानमेकमनेकेषामेककाल [उपक्रि]याम् ।
करोति याति नो हानिं दत्तं वर्धेत कौतुकम् ॥१८॥

---

१ 'कुरुतेऽर्जुन' इति भगवद्गीतायाम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अपास्यति कुवासनां भवशतार्जितां तर्जितां
प्रमार्जयति दुर्जयं निबिडपापरूपं रजः ।
प्रकाशयति च स्फुटं किमपि वस्तुतत्त्वं परं
करोति सकलं शुभं परिणता विदेषा नृणाम् ॥१९॥

मुष्णाति विषयतृष्णां पुष्णाति [१०–२] च निर्वृतिं हरत्यरतिम् ।
अमृतमिव ज्ञानमिदं कोपाद्युपतापमपनुदति ॥२०॥

विलसदतुलमोदं मानसं मानमुक्तं
विपुलपुलकपूर्णं तूर्णमङ्गं विधत्ते ।
श्रुतिसुखमसमानं लोचने चाश्रुगर्भे
श्रुतमपि जिनवाक्यं श्रेयसानै(मे)कहेतुः ॥२१॥

दहति मदनवह्निर्मानसं तावदेव
भ्रमयति तनुभाजां कुग्रहस्तावदेव ।
तुलयति गुरुतृष्णा राक्षसी तावदेव
स्फुरति हृदि जिनोक्तो वाक्यमन्त्रो न यावत् ॥२२॥

[११–१] त्रुटयन्ति स्नेहपाशा झटिति विघटते दुर्निवारा दुराशा
प्रोढो गाढाधिरूढो रहयति दृढतां कर्मबन्धप्रबन्धः ।
ध्वंसन्ते ध्वान्तपूगा इव दिवसपतेः पातकार्थाभियोगा
योग्यानां ज्ञानयोगादुपरमति मतिर्गेहदेहादितोऽपि ॥२३॥

शास्त्राञ्जनेन जनितामलबुद्धिनेत्र-
स्तन्त्रोपकल्पितमिवाखिलजीवलोकम् ।
लोलं विलोकयति फल्गुमवल्गुरूपं
नास्थामतो वितनुते तनुकाञ्चनादौ ॥२४॥

सज्ज्ञानलोचनमिदं भविनोऽसमानं
भूतं भविष्यदपि [पश्यति] वर्तमानम् ।
सूक्ष्मं तिरोहितमतीन्द्रियदूरवर्ति
ज्ञेयं विलोकयति [११–२] विष्टपमध्यवर्ति ॥२५॥

विनापि चक्षुषा रूपं निश्चिन्वन्ति विपश्चितः ।
चक्षुष्मन्तोऽपि नाज्ञाना हेयोपादेयवेदिनः ॥२६॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शास्त्रनेत्रविहीनो हि वाहरोहादिवर्जितः ।
पशोरपि नरः पापः कथं जीवन् न लज्जितः ? ॥२७॥

नरेण शास्त्रशून्येन किं शोच्येन विपश्चिताम् ।
तिरश्चोऽपि जघन्येन लब्धनाशितजन्मना ॥२८॥

श्लाघ्याः सुलब्धजन्मानः स्पृहणीया विवेकिनाम् ।
पूजनीया जनस्यान्ये धन्याः शास्त्रविशारदाः ॥२९॥

श्रूयन्ते श्रुतिनोऽश्रान्तं श्रेणिभिः श्रीमतां श्रिताः ।
विश्राणयन्तः श्रेयांसि श्रुतीनां विश्रुताः श्रुताः ॥३०॥

पूज्यन्ते श्रुतशालिनो [१२-१] नृपशतैराज्ञाविधेयैर्जनै--
रन्यैरप्यनुवासरं सविनयैर्भक्त्या विनेयैरिव ।
सेव्यन्ते च शुभोपदेशकुशला धर्मार्थकामार्थिनां
सार्थैः स्वार्थपरार्थतत्परधियो देवा इवाराधकैः ॥३१॥

कुर्वाणा गीर्वाणा निर्वाणार्थं श्रुतस्य बहुमानम् ।
श्रूयन्ते श्रुतभाजां महामुनीनां च बहुमानम् ॥३२॥

जायन्ते च यतीनां श्रुतानुभावेन लब्धयो विविधाः ।
फलमैहिकमामुष्मिकममलामरनरशिवसुखानि ॥३३॥

धर्मार्थकाममोक्षाणां कीर्तेश्चैकं [१२-२] प्रकीर्तितम् ।
ज्ञानं जलमिवावन्ध्यं धान्यानां सन्निबन्धनम् ॥३४॥

इदं विदित्वा श्रुतसङ्ग्रहे गुरु-
गुरुक्रमाम्भोजरतैरनारतम् ।
समीहमानैरसमां समुन्नतिं
समुद्यमः सद्विधिना विधीयताम् ॥३५॥

गुरुजनमुखे भक्त्या न्यस्यन् मुहुर्मुहुरीक्षणे
क्षणमपि कथां कुर्वन्नान्यां न चापरचिन्तनम् ।
उपचितरुचिः सूत्रस्यार्थे शिरोरचिताञ्जलिः
पुलकितवपुः पृष्ठे जल्पंस्तथेति समाहितः ॥३६॥

उदानन्दाश्रि(क्षि)णी बिभ्रन् नेत्रपात्रे पवित्रितम् ।
स्वं कृतार्थं [१३-१] च मन्वानः पिबेत्तद्वचनामृतम् ॥३७॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नीचासनो न चासन्नो नातिदूरे न पृष्ठतः ।
न पार्श्वतः समश्रेण्या पुरोऽपि न पराङ्मुखः ॥३८॥
सम्मुखीनोऽग्रतः पृष्ठे स्थास्नुकायः स्थिरासनः ।
नैवान्नपादिकां कुर्यान्नैव पादप्रसारिकाम् ॥३९॥

अवष्टम्भं न पट्टादौ नापि पर्यङ्कबन्धनम् ।
नाधिक्षेपं विवादं नो न सावज्ञं न चापरम् ॥४०॥

व्याख्यानादन्यदाप्येषां चेतसे यन्न रोचते ।
अपथ्यमिव दूरेण हितैषी तद्विवर्जयेत् ॥४१॥

चित्तानुवर्ती सर्वत्र प्रविष्ट इव चेतसि ।
प्रवर्तेत निवर्ते[१३-२]त हितकारी प्रियङ्करः ॥४२॥
यथा पूर्वं तथा पश्चाद् यथाऽग्रे पृष्ठतस्तथा ।
निर्व्याजवृत्तिः पूज्यानां सुखीकुर्यान्मनः सदा ॥४३॥

इति गुरुजनं भक्त्याऽऽराध्य प्रयत्नपरायणा
विमलमनसो धन्या मान्या जनस्य सुमेधसः ।
श्रुतजलनिधेर्गत्वा प्रान्तं नितान्तमहीयसः ।
सपदि सुखिनः सम्पद्यन्ते पदं परसम्पदाम् ॥४४॥

नो माता सुतवत्सला न च पिता स्वामी प्रसन्नो न वा
न भ्राता सहजाञ्जसो न सुहृदो नार्था न हस्त्यादयः ।
यन्निष्कारणनिष्कलङ्ककरुणाः सर्वोपकारोद्यता
[१४-१] हेयादेयविपश्चितस्तनुमतां श्रीसूरयः कुर्वते ॥४५॥

गुरूपकारः शक्येत नोपमातुमिहापरैः ।
उपकारैर्जगज्ज्येष्ठो जिनेन्द्रोऽन्यनरैर्यथा ॥४६॥
जन्मशतैरपि शक्यं नृभिरानृण्यं गुरोर्न तु विधातुम् ।
तद्गुणदानाभावे ते च गुणास्तस्य सन्त्येव ॥४७॥

ततो गुरूणां चरणाम्बुजं सदा
कृतज्ञभावेन कृती निषेवते ।
पदं महासम्पदमन्यदोहितं
हितं मनोहारि यशां(शां)सि विन्दते ॥४८॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ये शृण्वन्ति वचो जिनस्य विधितो ये श्रावयन्त्यादृता
मन्यन्ते बहु ये पठन्ति सुधियो ये पा[१४-२]ठयन्ते परम्।
ये भूयो गुणयन्ति येऽपि गुणिनः सञ्चिन्तयन्त्युद्यता-
स्ते कर्म क्षपयन्ति भूरिभवजं तापं पयोदा इव ॥४९॥

बोधयन्त्यमलबोधशालिनो
ये जनं जिनमतं महामतिम्।
सत्त्वसार्थमखिले महीतले
लीलयैव परिपालयन्ति ते ॥५०॥

दर्शनचारित्रादेर्ज्ञानान्तर्भावतः पृथग् नोक्तम्।
तद्रूपज्ञापनतो न परं दानं यतोऽस्यास्ति ॥५१॥

गुणगौरवनाशकारणं
स्यादर्थित्वमतीव निन्दितम्।
ज्ञानस्य तदेव वन्दितं
गुणगौरवकरमत्र कौतुकम् ॥५२॥

[१५-१] ज्ञानस्य कश्चिदपरो महिमाद्भुतोऽस्य
दाताऽर्थिभिस्तदपरैः परिपूज्यतेऽतः।
– – – – – – – – – – – – – –
प्राप्तो – – – – – – – – – – – – – – ॥५३॥

– रेवामयसागरं गुरुधियो याताः सृजन्ति स्वयं
यच्छात्राणि सुमेधसः सुकृति – – – – – – – – –
– – – – – – – – – – – – – – – – – – – – – –
स्तद्दत्तस्य निरीहमानमनसा ज्ञानस्य लीलायितम् ॥५४॥

॥ द्वितीयोऽवसरो[१५-२]ऽवसितः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## तृतीयोऽवसरः

दानं द्वितीयमभयस्य तदद्वितीयं
धर्मस्य साधनमबाधनधीधनानाम् ।
— — — — — — — — — — — — — —
— — — — — — — — — — — — — — दः ॥१॥
वपुरिव वदनविहीनं वदनमिव विलुप्तलोचनाम्भोजम् ।
एतद्विकलं सकलं — — — — — — — — — — — — — — — — — ॥२॥
— — — — — — — — — — — — — —
— — — — — विधानमनेकधा ।
निखिलमेतदनेन विवर्जितं
तमसि नर्तनमेव निवेदितम् ॥३॥
ज्ञानाभ्यासो गुरुजननुति — — — — — — —
— — — — — — — — — — — — — — — —
— — [१६-१] हानीव प्रकटमहिमश्रीरसेन्द्रान्वितानि
श्रेयः साध्यं फलमविकलं कुर्युरेतद्युतानि ॥४॥
लाभविकलं वाणिज्यं भक्तिविहीनं च देवतास्तवनम् ।
ज्ञानं च जीवरक्षणरहितं भस्मनि हुतं नियतम् ॥५॥
वदतु विशदवर्णं कर्णपीयूषवर्षं
पठतु ललितपाठं भव्यकाव्यं करोतु ।
विमलसकलशास्त्रं बुद्धचतां शुद्धबुद्धि-
र्यदि न खलु दयालुः स्यात्तदाऽरण्यरोदी ॥६॥
पठितं श्रुतं च शास्त्रं गुरुपरिचरणं च गुरुतपश्चरणम् ।
घनगर्जितमिव विजलं विफलं सकलं दयावि[१६-२]कलम् ॥७॥
दीक्षाऽऽदानं गुरुपदयुगाराधनं भावसारं
ज्ञानाभ्यासः सुचिररचितश्चित्तवृत्तेर्निरोधः ।
गाढाः सोढा दृढतरधिया दुःसहा शीतवाताः
वह्नावुप्तं ननु यदि दयाशून्यमेतत् समस्तम् ॥८॥
तदेतद्धर्मसर्वस्वं तदेतद्धर्मजीवितम् ।
रहस्यमेतद्धर्मस्य यदेतत् प्राणिरक्षणम् ॥९॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जन्म पुरुषार्थैरहितं पुरुषार्थो धर्मवर्जितः पुंसाम् ।
धर्मश्च दयाविकलो विफलं च विडम्बनं चेदम् ॥१०॥
विभवविकलो विलासी विकामिनीकश्च कामुकविलासः ।
रमणी च रू[ १७-१]परहिता न शोभते निर्दयो धर्मः ॥११॥
विनयविहीनं शिष्यं गुरुमपि तत्त्वोपदेशनाशून्यम् ।
निर्ज्जीवदयं धर्मं न जातु सन्तः प्रशंसन्ति ॥१२॥
जीवितव्यादपि श्रेष्ठं प्राणिनां वस्तु नापरम् ।
तत्साधनं तदर्थं च समस्तमपरं यतः ॥१३॥
जन्तूनां जीविते दत्ते किं न दत्तमिहापरम् ।
अपनीतेऽपनीतं वा तन्मूलमखिलं यतः ॥१४॥
पुत्रं मित्रं कलत्राणि जीवितार्थेऽर्थसम्पदम् ।
त्यजन्ति जन्तवो जातु जीवितं न कथञ्चन ॥१५॥
प्राणेभ्यो नापरं प्रेयो न पुण्यादपरं हितम् ।
न प्राणिरक्षणादन्यत् पु[ १७-२]ण्यं जगति विद्यते ॥१६॥
राज्यं प्राज्यं ललितललना मत्तमातङ्गपूगान् ।
भक्तान् पत्तीन् पवनजविनो वाजिनः स्यन्दनाँश्च ।
भाण्डागारं नगरनिकरं मेदिनीमन्यदिष्टं
दिव्यं सर्वं तृणमिव जनो जीवितार्थे जहाति ॥१७॥
एकच्छत्रं ददात्येको महादाता महीतलम् ।
प्राणानन्यस्तु वध्यस्य प्राणदाताऽतिवल्लभः ॥१८॥
प्राणत्राणात् परं दानं ज्ञानाभ्यासात् परं तपः ।
जिनागमात् परं शास्त्रं नास्त्याराध्यं गुरोः परम् ॥१९॥
अभयदाननिदानतया स्तुतं
वितरणं तु विदः खलु कोविदैः ।
[ १८-१] अशनसद्वसनाद्यपि दीयते
जगति जीवितपालनलोलुपैः ॥२०॥
निखिलदानफलं तदिदं मतं
मतिमतामभयस्य विहायितम् ।
सकलसत्त्वसमूह[समी? ]हितं
महदतो महितं जगते हितम् ॥२१॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञानदानं समीहन्ते महीयांसो महाधियः।
महनीया महाभागा विरलाः केऽपि मानवाः ॥२२॥
अन्नादेश्च ग्रहीतारस्तारकास्तारचेतसः ।
दुर्लभा मुनयोऽन्येऽपि दीनाद्याः कतिचिन्नराः ॥२३॥

सम्पत्त्यभावादशनादि दातुं
ज्ञानं च शक्यं सकलैर्न लोकैः ।
अदीय[ १८-२]मानेऽपि न च द्वयेऽपि
सम्पद्यतेऽस्मिन्नरकादिपातः ॥२४॥

अभयमदत्तं दारुणनरकादिनिपातकारणं तेन ।
स्ववशमकष्टमनश्वरमनिशं देयं कुशलकामैः ॥२५॥
विषयोऽस्य सर्वजीवा मुक्ताः संसारिणश्च ते द्वेधा ।
संसारिणो द्विधा स्युः स्थावरजङ्गमविभागेन ॥२६॥
अवनिवने पवनसखः पवनश्च वनस्पतिश्च पञ्चविधाः ।
स्थावरसंज्ञा ज्ञेया विकलाक्षा द्वित्रिचतुरक्षाः ॥२७॥
पञ्चेन्द्रियैः सहैते जङ्गमनाम्ना समाम्नाताः ।
इति जीवा निजजीवितसदृशाः सदृशा [सदा] दृ[१९-२]श्याः ॥२८॥

नानादुःसहदुःखदूनमनसो दीना दयाभाजनं,
जायन्ते यदतीवतीव्रविविधव्याधिव्यथाव्याकुलाः ।
दारिद्र्योपहताः पराभवपदं यन्मानिनो मानवा-
स्तन्मन्ये परपीडनाविषतरोः पुष्पं फलं चापरम् ॥२९॥

उदग्रतारुण्यजुषां च योषितां
यदत्र वैधव्यमहाविडम्बना ।
भवेदथो दुर्भगतादरिद्रता-
प्रभृत्यदो निर्दयताविजृम्भितम् ॥३०॥

सम्पद्यते मृतापत्या पत्या नित्यं वियुज्यते ।
पतत्यत्यन्तसापत्न्ये स्त्री निस्त्रिंशतयाऽनिशम् ॥३१॥

इहामगर्भेषु च यान्ति जन्तवो
[१९-२] मृतिं कुमारास्तरुणाश्च दारुणाम् ।
अपूर्णकामा कमनीयकामिनी-
मनोरमा निर्दयताप्रसादतः ॥३२॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यज्जीवलोके लोकानामकल्याणं विलोक्यते ।
हिंसाफलमिदं सर्वं वदन्ति वदतांवराः ॥३३॥

दहनदम्भनवाहनदोहनै-
वेधविबन्धनरोधनकर्तनैः ।
दमनभेदनखेदनमारण-
प्रमुखदुःखगणैरतिदारुणैः ॥३४॥

दन्दह्यन्ते कृपाऽपात्रं विचित्रैः पशवोऽत्र यत् ।
स जन्तुघातसञ्जातपापपादपपल्लवः ॥३५॥

उदन्यया दुःसह[२०-१]याऽशनायया
नितान्तशीतातपवातपीडया ।
मृतिं मृगाद्या गुरुभिर्गदव्रजै-
र्व्रजन्ति तज्जन्तुविघातचेष्टितम् ॥३६॥

असम्प्राप्तप्रतीकाराः सतां कारुण्यगोचराः ।
चिरं जीवन्ति रोगार्ता जीवघाताद्वनेचराः ॥३७॥

प्रपाय्यन्ते तप्तं त्रपु दहनकल्पं दहदहो
प्रखाद्यन्ते मांसं निजतनुसमुत्थं सुविरसम् ।
विपाटयन्ते चित्रैर्निशितकरपत्रैरकरुणं
प्रशाय्यन्ते शय्यां प्रतिदहन[२०-२]हेतिप्रतिभयाम् ॥३८॥

कुम्भीपाकेन बध्यन्ते प्रास्फाल्यन्ते शिलातले ।
पील्यन्ते चित्रयन्त्रेषु परतन्त्रा यथेक्षवः ॥३९॥

इत्थं कदर्थनमनेकविधं सहन्ते
यन्नारका नरककूपकमध्यमग्नाः ।
कालं प्रभूतमतिमात्रमनन्तरालं
हिंसाफलं तदखिलं खलु खेलतीह ॥४०॥

जन्तूपघातजनितोत्कटपातकस्य
मत्वा कटुं प्रकटमत्र विपाकमेनम् ।
भव्या भवन्तु भवसम्भवदुःखभीताः
प्राणिप्रबन्ध[२१-१]परिरक्षणबद्धकक्षाः ॥४१॥

येषां यत्र समुत्पत्तिस्तेषां तत्र परा रतिः ।
निम्बकीटस्य निम्बेऽपि रतिर्लोकेऽपि कथ्यते ॥४२॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पुरन्दरः पुरन्दारैरुदारैः सममामरीम् ।
अधिष्ठितो यथा मर्तुं तथा मर्त्योऽपि नेच्छति ॥४३॥
अमेध्यमध्ये कीटस्य सुरेन्द्रस्य सुरालये ।
समाना जीविताकाङ्क्षा तुल्यं मृत्युभयं द्वयोः ॥४४॥
दरिद्रो दुर्भगो दुस्थः सदाधिव्याधिबाधितः ।
पराश्रितः पराभूतः प्राणी प्राणितुमिच्छति ॥४५॥
येन ये[२१-२]न प्रकारेण प्राणिनां जायते व्यथा ।
तं तं दूरेण धर्मार्थी वर्जयेद् दुर्जनं यथा ॥४६॥
सकलरोगजराविकला जना
जनितसज्जनमानसरञ्जनाः ।
यदतुलं विलसन्ति चिरायुष-
स्तदखिलं खलु जीवदयाफलम् ॥४७॥
रतिं रतेरुत्तमरूपसम्पदा
सदा नुदन्त्यः सुखसम्पदां पदम् ।
दयानुभावेन विभूतिभाजनं
भवन्ति रामाः सुभगाः शुभाङ्गजाः ॥४८॥
कन्दर्पं नष्टदर्पं प्रविदधदधिकं देहकान्त्या लसन्त्या
लोकानां नेत्रपात्रैर्नव इव रज[२२-१]नीनायकः पीयमानः ।
मर्त्यैः पुत्रैः कलत्रैर्विरहविरहितो मोदते दीर्घकालं
कल्पः कल्याणहेतोरभयवितरणात्तारतारुण्यपुण्यः ॥४९॥
निर्व्यासङ्गमनङ्गतापरहिता यत् प्रेयसीसङ्गताः
श्रीशृङ्गाररसैकसागरगता निश्चिन्तचित्ता नराः ।
नीरोगा जरसा विमुक्तवपुषो जीवन्ति पल्यत्रयं
तन्मन्येऽभयदाननिर्मलसच्चिन्तामणेश्चेष्टितम् ॥५०॥
अनुत्तरनिवासिनो [२२-२] यदतराणि भूयांस्यहो
सदा सुखमनुत्तमं शिवसुखोपमं भुञ्जते ।
अचिन्त(न्त्य)मवपुःक्रियं विगतपारवश्यव्यथा
व्यतीतविषयस्पृहास्तदतुलं दयायाः फलम् ॥५१॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यन्निर्वाणे जननमरणव्याधिमुक्ते विमुक्ता
वाञ्छोच्छेदोच्छलितकलितक्लेशविश्लेषसौख्ये ।
श्लाघ्यस्थानोपमितिरहिते नित्यमेकान्तकान्ते
संतिष्ठन्ते विलसितमिदं प्राणिसंरक्षणस्य ॥५२॥
स्वर्गापवर्गसुखसम्पदियं परोक्षा
प्रत्यक्षमेव फलमेतदहिंसकस्य ।
यत्प्रस्तुतस्तुतिकृतानति विश्वविश्वं
विश्वासमेति कु – – – – – – – [२३–१] स्तवम् ॥५३॥

॥ तृतीयोऽवसरोऽवसितः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## चतुर्थोऽवसरः

अन्नादिदानमिदमस्तनिदानबन्धं
सद्भावनाविधिपरस्य भवप्रबन्धम् ।
छिन्ते यशो वितनुते कुशलं प्रसूते
दातुः परं जनयतीह जनानुरागम् ॥१॥
आगांसि संस्थगयति प्रकटीकरोति
विद्यादिकं गुणगणं गणनां विधत्ते ।
क्रुद्धं प्रसादयति सादयते विपत्तिं
सम्पत्तिमानयति किं न शुभं बिभर्ति ॥२॥
स्वर्गादिमुख्यसुखसम्पदवाप्तिहेतुः
संसारसागरसमुत्तरणैकसेतुः ।
दानं जिनेन सदनस्थजनस्य युक्त-
मग्रेसरं सुकृतसा[२३–२]धनमेतदुक्तम् ॥३।
शूरः सुरूपः सुभगोऽस्तु वाग्मी
शस्त्राणि शास्त्राणि विदाङ्करोतु ।
दानं विना दिग्वलयं समस्तं
मर्त्यो न कीर्त्या धवलं विधत्ते ॥४॥
आहाराद्यं भवति ददता साधुदेहं प्रदत्तं
दत्ते देहे सकलमतुलं निर्मलं धर्मकर्म ।
तस्माद्दानं निरुपममिदं साधनं धर्मराशे-
रस्याभावे विरमति यतो मुक्तिमार्गः समग्रः ॥५॥
अकलाकुशले कुलशीलवर्जिते सकलविमलगुणविकले ।
दातरि कल्पतराविव नरे नु रज्यन्ति जननिवहाः ॥६॥
अशेषदोषसङ्घातं दानमे[२४–१]कं शरीरिणाम् ।
तिरोदधाति वस्तूनां रूपं वान्तरिवोद्धतम् ॥७॥
शीलं कुलं कुशलतां च कलाकलापे
शौचं शुचीनि चरितानि तथाऽपराणि ।
विश्राणनं तनुमतां नयति प्रकाशं
वस्तूनि रोचिरिव चण्डरुचेः प्रचण्डम् ॥८॥



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समग्रसद्गुणग्रामग्रामणीरिव गण्यते ।
निर्गुणोऽपि जनैर्दाता चिन्तामणिरिवोपलः ॥९॥

कान्ता नितान्तकुपिता निजवल्लभाय
यावल्लभेत शुभदुर्लभभूषणादि ।
तावत् प्रसीदति निषीदति सन्निधाने
दानं प्रसाधनविधाविह सिद्धतन्त्रम् ॥१०॥

कान्ताप्रसादनविधिप्रमु[२४-२]खं न मुख्यं
दृष्टान्तमात्रमिदमत्र फलं मयोक्तम् ।
दानार्जितोर्जितशुभोदयतस्तु पुंसां
कल्याणमेव सकलं भवतीति युक्तम् ॥११॥

द्रविणं विश्राणयतामुपद्रवा विद्रवन्ति पुरुषाणाम् ।
दानं व्यसनहुताशनविनाशनघनाघनवनौघः ॥१२॥

स्पर्शनं सपदि सम्पदां पदं
हाटकस्य निपतन्ति कोटयः ।
पात्रदातृसदनेषु दानतः
सुप्रसिद्धमिदमागमे यतः ॥१३॥

भोगाः श्रीशालिभद्रप्रमुखतनुमतां सम्मताः सुप्रसिद्धाः
सिद्धान्ते मूलदेवप्रभृतितनुभृतां प्राज्यराज्यादयश्च ।
निर्वाणं श्रीजि[२५-१]नेभ्यः प्रथमपृथुतपोऽनन्तरं पारणायां
दातॄणां तत्र दानात् फलमलघु भवे वादि(?) यद्वा तृतीये ॥१४॥

एकं वस्तु वितीर्यमाणमडकं (?) राजादिसाधारणं
[राज्यं स]त्वरगत्वरं स्थिरतरं स्थूरं परव्याहतम् ।
सूते कीर्तिजनानुरागसुकृतस्तोमं तथाप्युद्यमो
दाने किं न विधीयते ध्रुवमहालाभे शुभे लोभिनः ! ॥१५॥

सत्यं चेद्भवतां प्रियं धनमपि प्राणात्यये दुस्त्यजं
वृद्धिं यातममन्दसम्मदरसं चित्ते विधत्ते जनाः(?) ।
सुक्षेत्रेषु तदाखिलेषु वपत श्रद्धाम्बुभिः सिञ्चत
श्रेयोऽनन्तगुणं भविष्यति यतः कालेऽब(? म)लं प्राप्नुत ॥१६॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

हर्म्ये रम्ये तीर्थनाथस्य बिम्बे
श्लाघ्ये सङ्घे पुस्तके च प्रशस्ते ।
सप्तक्षेत्र्यां मोक्षलक्ष्मीं प्रसूते
सूप्तं भव्यैः सत्तमं वित्त[२५-२]बीजम् ॥१७॥

मदनसूदनसुन्दरमन्दिरं
गरिमनिर्जितलज्जितमन्दरम् ।
भवति कारयतां करवर्तिनी
प्रणयिनीव विमानवरावली ॥१८॥

ये कारयन्ति सदनं भवसूदनस्य
ते भासुरं सुरविमानममानमाप्य ।
हारा इवातिकमनीयकुचोन्नतेषु
वक्षस्थलेषु विलसन्ति विलासिनीनाम् ॥१९॥

सुन्दरं मन्दरोदारं मन्दिरं मदनद्विषः ।
कारयित्वाऽधिरोहन्ति सालम्बा लीलया दिवम् ॥२०॥

भग्नाद्रिशृङ्गशृङ्गारमगारं त्रिजगद्गुरोः ।
निर्माय निर्मलं धाम शिवं धावन्ति धार्मिकाः ॥२१॥

तार्णं पार्णं भक्तिपूर्णाः कुटीरं
शक्त्या जैनं ये जनाः कारयन्ते ।
मुख्यं सौख्यं तेऽपि मर्त्यामराणां
भूयो भुक्त्वा मोक्षलक्ष्मीं लभन्ते ॥२२॥

अधममध्यमसत्तम – – – [२६-१]
सदनपुस्तकसुप्रतिमादितः ।
भवति येन फलं न भिदेलिमं
किमुत सत्परिणामविशेषतः ॥२३॥

भो भो भव्या विभाव्येदं यतध्वं भावशुद्धये ।
सर्वकामदुघा श्लाघ्या भावशुद्धिः शुभात्मनाम् ॥२४॥

धर्मसत्रं गुणक्षेत्रं प्राणित्राणामृतप्रपा ।
श्रीजिनायतनं नाम समाम्नातं मनीषिभिः ॥२५॥

स्वर्गापवर्गसोपानं दुर्गतिद्वाररोधनम् ।
मन्दिरं मदनारातेरामनन्ति मनस्विनः ॥२६॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आयान्या(?) यतते[२६-२] यतो यतिजनाः कुर्वन्ति सद्देशनां
श्रुत्वा धर्मपरा भवन्ति भविनो भव्या भवाम्भोनिधिम् ।
अक्लेशेन तरन्ति दुस्तरतरं तस्मादिदं कुर्वता
कल्याणं सकलं जनस्य जनितं सत्त्वेन सत्त्वाप्तिना ॥२७।

मर्त्यमस्तकमाणिक्यं क्षोणीमण्डलमण्डनम् ।
कोऽपि कारयते पुण्यः कुलकेतुर्निकेतनम् ॥२८॥

तेन कृत्यं कृतं सर्वं दुष्कृतं च निराकृतम् ।
कृतिना कारितं येन केतनं पुण्यकेतनम् ॥२९॥

रोचिष्णुरत्नचयनिर्मि[२७-१]तनिर्मलाङ्गीं
स्फारां स्फुटस्फुरदुरुस्फुटिकां सुरूपाम् ।
श्रीराजपट्टघटितां प्रबलप्रवालां
कार्तस्वरप्रवरभास्वरकान्तकायाम् ॥३०॥

सद्रीतिका-रजत-दन्तमयीं महिष्ठां
श्रेष्ठां गरिष्ठशुभकाष्ठकृतप्रतिष्ठाम् ।
ये मृण्मयीमपि तनिष्ठितनुं स्वशक्त्या
निर्मापयन्ति विधिना प्रतिमां जिनस्य ॥३१॥

वियोगदौर्भाग्यदरिद्रताव्यथां
पराभवं दुस्सहदुःस्थताकथाम् ।
विदन्ति वार्तामपि तेन दुर्गते-
रभीष्टपुण्या इव पापसङ्गतेः ॥३२॥

सत्यङ्कारोर्पितः स्वर्गे मर्त्यशर्म वशीकृतम् ।
शासनं क्षेप्तिं मोक्षे पुंसा कारयता जिनम् ॥३३॥

कल्याणसम्पदखिलाऽपि वशीकृतोच्चै-
रुच्चाटितं स्वमनसो ननु वैमन[ २७-२]स्यम् ।
विद्वेषितोऽनभिमताहितसम्प्रयोगः
संस्तम्भितोऽतिशुभवल्लभविप्रयोगः ॥३४॥

तन्नास्ति यन्न विहितं स्वहितं प्रशस्तं
तन्नास्ति यन्न दुरितं त्वरितं निरस्तम् ।
मर्त्येन संविदधता प्रतिमाप्रतिष्ठा-
मात्मा नरोत्तमपदे गमितप्रतिष्ठाम् ॥३५॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्वविषयभुक्तिभूर्जे स्वहस्तितं सौख्यपत्तला लिखिता ।
मुक्तौ दूतो भूतः स्थापयतां जिनपतिप्रतिमाम् ॥३६॥
सत्पुरुषाणां मध्ये कृतो निबद्धो निवारिता सेवा ।
जिनराजाज्ञाराधनविधानतः फलमिदं सिद्धम् ॥३७॥
प्रतिष्ठि[२८-१]तो जगन्नाथो यावन्नालङ्कृतो नराः ।
कथङ्कारमलङ्कारैस्तावद् भूयेत भूतले ॥३८॥
यत्नेन रत्नखचितं रुचितं तिरीटं
ये हाटकादिघटितं स्फुटकोटिकूटम् ।
भक्त्या जिनाधिपतिमूर्ध्नि निवेशयन्ति
ते शेखरा इव शिरःसु नृणां भवन्ति ॥३९॥
ये जिनपतिभालतले तिलकं रचयन्ति रत्नचयरुचिरम् ।
स्युर्महतामपि महिता महीतलस्यापि तिलकास्ते ॥४०॥
[२८-२] देवकर्णयुगले तु कुण्डले
कुर्वतां स्फुरितदीप्तिमण्डले ।
जीव नन्द जय देव केवलं
पेशलं विशति कर्णयोर्वचः ॥४१॥
ग्रैवेयं ग्रीवायां समग्रजगदग्रिमस्य रचयन्ति ।
ये रत्नरचितमुचितं चञ्चच्चामीकरं चारुम् ॥४२॥
कण्ठोपकण्ठे कठिनस्तनीनां
हठाल्लुठत्युज्ज्वलकण्ठिकेव ।
उत्कण्ठिता कोमलकामिनीनां
तेषां नतिः सन्ततमातताक्षी ॥४३॥
यस्तीर्थकृतां सुकृती हारं वक्षस्थले[२९-१]ऽवलम्बयति ।
हारायते मनोहरहरिणाक्षीणां स हृदयेषु ॥४४॥
श्रीवत्समतिविशाले जिनेशवक्षःस्थले निवेशयताम् ।
शेते वक्षस्तल्पे श्रान्तेव श्रीरविश्रान्तम् ॥४५॥
अङ्गदे जगदीशस्य कुर्वतामङ्गसङ्गिनी ।
जयश्रीः बाढबद्धेव बाहुदण्डौ न मुञ्चति ॥४६॥
यो जिनभुजयोर्भक्त्या निवेशयेन्मणिमयानि वलयानि ।
भूवलयं भुजयुगले प्रविलसति विलासिनस्तस्य ॥४७॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवमादिमलङ्कारं कारयन्ति जिनस्य ये ।
निवारयन्ति [ २९–२] दुर्वारं नरास्ते दुःखवारणम् ॥४८॥

स्नात्रं जगत्त्रयपतेर्विधिना विधाय
सर्वाङ्गसङ्गतमसङ्गतसर्वतापाः ।
निर्धूतधौतकलधौतरुचोतिरोच्यं
श्रेयोऽनुभूय भवभावभिदो भवन्ति ॥४९॥

नश्यन्ति मलतापाद्याः कुर्वतां जिनमज्जनम् ।
आश्चर्यं न विचार्यन्ते विभूनां हि विभूतयः ॥५०॥

श्रीखण्डकुङ्कुमरसादिविलेपनानि
कर्पूरसन्मृगमदादिविमिश्रितानि ।
कृत्वा विभोः सुरभिसुन्दरदीप्रदेहा
दिव्याङ्गनाजनमनोऽभिमता रमन्ते ॥५१॥

महामूल्यै[ ३०–१]र्माल्यैः परिमलमिलन्मत्तमधुपैः
सपर्यां पर्याप्तां सकलजगदाप्तस्य विधिना ।
विधायोल्लोचाद्यं विविधमनवद्यं सरभसः
सुरस्त्रीभिः सार्धं विलसति शिवं चानुवसति ॥५२॥

भक्ताद्यैर्भूरिभक्षैर्हृतजनहृदयैर्मोदकाद्यैः सुखाद्यैः
सारैश्चित्रैः पवित्रैः सुरससुरभिभिः पेयचूष्यावलेह्यैः ।
द्वेधा सद्भक्तियुक्तं बलिमतुलफलं देवदेवाय दत्त्वा
गृह्णीताह्नाय भव्या निधिमिव विधिना शर्मदं[ ३०–२] धर्मराशिम् ॥५३॥

दूराकारितभूरिलोकनिकरां सर्वत्र दत्ताभयां
दानानन्दितदीनमार्गणगणां सङ्गीतवाद्याद्भुताम् ।
यात्रां चित्रविलासलास्यसुभगां तुङ्गभ्रमत्स्यन्दनां
कृत्वा तीर्थकृतां भवन्ति कृतिनो नित्यप्रवृत्तोत्सवाः ॥५४॥

॥चतुर्थोऽवसरोऽवसितः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## पञ्चमोऽवसरः

आगमो वीतरागस्य वचनं स्यादवञ्चनम् ।
सम्मोहरागरोषाः स्युर्दोषा वञ्चनहेतवः ॥१॥

युक्तायुक्तं विवेक्तुं ना मूढो परिवृढो दृढम् ।
[३१-१]ब्रूते हेयमुपादेयं द्रव्यं कूटं खरं यथा ॥२॥

रक्तो वक्ति निराचारं सदाचारं सुहृज्जनम् ।
द्विष्टो द्विषज्जनं शिष्टमाचष्टे दुष्टचेष्टितम् ॥३॥

इत्थं मोहादिदोषेण पुरुषो भाषते मृषा ।
रागादिदोषमुक्तस्य किमुक्तौ कारणं मुधा ॥४॥

वचो विचार्यमाणं तु विचारचतुरैर्नरैः ।
अकर्तृकं घटाकोटिसंटङ्कं नातिटीकते ॥५॥

ताल्वादिहेतुव्यापारपारवश्येन दृश्यते ।
अवश्यं वचनं सर्वं तत् कथं कथ्यतेऽन्यथा ॥६॥

यदुत्पाद्यः पदार्थो हि निश्चितो यो विपश्चि[३१-२]ता ।
सततः सर्वदा ज्ञेयो धूमो धूमध्वजादिव ॥७॥

अथ वेदस्य कर्तारं नरं नोपलभामहे ।
अपौरुषेयतामस्य परिभाषामहे ततः ॥८॥

देशान्तरादावुत्पन्नाः पदार्था ये पटादयः ।
अदृष्टकर्तृकास्तेऽपि नन्वेवं स्युरकर्तृकाः ॥९॥

अथैतेषां विधातारस्तद्देशादिव्यवस्थितैः ।
प्रमीयन्ते ततः सन्तु पौरुषेयाः पटादयः ॥१०॥
ननु वेदस्य कर्तारं तद्देशादिगता जनाः ।
न जातु जानते वेत्ति कथमेतद्भवादृशः ॥११॥

वेदकर्तृपरिज्ञातृशून्यं विश्व[३२-१]मिदं सदा ।
इति यो वेत्ति सर्वज्ञः स एव भगवानिति ॥१२॥

किञ्च वेदो निजं नार्थं समर्थो भाषितुं स्वयम् ।
यज्ञतत्फलसम्बन्धं सम्बुध्यन्ते बुधाः कथम् ॥१३॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्वयं सङ्कल्प्य जल्पन्तो दोषदूषितबुद्धयः ।
प्रेक्षावतां कथं ग्राह्यवचनाः स्युर्द्विजा यतः ॥१४॥
नरोत्तमं निराकृत्यं(त्य) नरपाश पशुप्रियाः ।
धर्मोपदेशदातारं वदन्तो विप्रतारकाः ॥१५॥
ततोऽतीतादिकानन्तवस्तुविस्तारवेदकः ।
उपदेष्टा जिनो युक्तः सर्वसत्त्वहितो यतः ॥१६॥
प्रक्षीणदूषणव्रातः परार्थै[३२-२]कमहाव्रतः ।
निष्कारणो जगद्बन्धुर्बन्धुरः करुणाम्बुधिः ॥१७॥
अचिन्त्यपुण्यप्राग्भारः प्राप्ताद्भुतमहोदयः ।
सदेवचक्रशक्रादिचक्रवर्तिनतक्रमः ॥१८॥
समग्रसंशयग्रामध्वान्तविध्वंसनक्षमः ।
लोकालोकामलालोककेवलापूर्वभास्करः ॥१९॥
कान्तमेकान्ततः सर्वसत्त्वसार्थसुखावहम् ।
भाषते यज्जगन्नाथो वचनं तत् सदागमः ॥२०॥
पूर्वापराविरुद्धं दृष्टे संवादबाधितमदृष्टे ।
क्वचिदप्यतीन्द्रियेऽपि हि संवादादुष्टमाहात्म्यम् ॥२१॥
कान्तो जिनैरनेकान्तो व्याहृतो व्या[३३-१]हृतो न हि ।
जीवादिकः पदार्थो वा धर्मो वाध्यवधादिकः ॥२२॥
उत्पद्यन्ते विपद्यन्ते पदार्थाः पर्ययात्मना ।
ध्रुवा द्रव्यात्मना सर्वे बहिरन्तश्च सर्वदा ॥२३॥
निःसन्देहविपर्यासं पर्यायैः पर्युपासितम् ।
बाल्यादिभिर्निजं देहं पश्यन्नेकमहर्निशम् ॥२४॥
अन्तरात्मानमप्येकं शोकानन्दादिभिर्युतम् ।
समस्तवस्तुविस्तारं दोष(दिष्ट) मित्थं त्रयात्मकम् ॥२५॥
'कथं युक्तमनेकान्तं' दूषयत्येष सौगतः ।
सङ्गतासङ्गतज्ञानं यदि वाऽनात्मके कुतः ॥२६॥
यथा प्रत्यक्षतः सिद्धं पर्यायमनुमन्यसे ।
द्रव्यं [३३-२] तथाऽनुमन्यस्व न मुनेर्मत्सरः क्षमः ॥२७॥
उत्पत्त्यनन्तरं नष्टे पदार्थे सर्वथा वृथा ।
तपोनियमदानाद्या बन्धमोक्षौ च दुर्घटौ ॥२८॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्षणेन दातरि क्षीणे भोक्ता दानफलस्य कः ।
क्षणोऽन्यश्चेत् कृतध्वंसः स्यादेवं चाकृतागमः ॥२९॥
विनाशे प्राणिनोः सद्यो हिंसाध्यानादिकारिणोः ।
बन्धमोक्षौ कयोः स्यातामन्ययोश्चेदहेतुकौ ॥३०॥
अस्तीह प्रचुरं वाच्यमरुच्यमिति नोच्यते ।
सुखावबोधं प्रायेण प्राणिभ्यो रोचते वचः ॥३१॥
प्रत्यक्षादिप्रतिक्षिप्तो नित्यपक्षोऽप्यसङ्ग[३४-१]तः ।
अपरापरपर्यायं पर्यालोक्यखिलं यतः ॥३२॥
किं च धर्माद्यनुष्ठानं निश्चलात्म[नि] निष्फलम् ।
न धर्मादुपकारोऽस्य नापकारोऽस्त्यधर्मतः ॥३३॥
ब्रह्महत्यादिदोषोऽपि नास्ति घाताद्यभावतः ।
बाल्यादि न युवादि स्यान्नित्यस्याविचलत्वतः ॥३४॥
इत्येकान्तोपगमे समस्तमसमञ्जसं समासजति ।
तस्मादुपगन्तव्यः प्रमाणतो वस्तुपरिणामः ॥३५॥
प्रतिसमयं प्राचीनं रूपमभवदुत्तरं च भवति पुनः ।
वस्तु ध्रुवं कथञ्चन काञ्चनवलितादि परिणामि ॥३६॥
यस्याभावे सर्वे व्यवहाराः सम्भवन्ति न जनस्य ।
जीयात् स जीवितसमोऽनेकान्तः सर्वथा कान्तः ॥३७॥
जीवादिकमपि तत्त्वं न विरुद्धं सत्प्रमाणतः सिद्धम् ।
जिनसिद्धान्ताभिहितं धर्माद्यपि सर्वसत्त्वहितम् ॥३८॥
बाधाविकलं सकलं धर्मादिकमप्यतीन्द्रियं वस्तु ।
युक्तं युक्तिविवक्त(चित्रै)रनुमीयत एव किञ्चिदपि ॥३९॥
यत्रापि नानु[३४-२]मानं क्रमते ननु मादृशस्य मन्दमतेः ।
बहुधा दृष्टावञ्चनजिनवचनात्तदपि निश्चेयम् ॥४०॥
लोकोऽपि सत्यवादं संवादाद्वादिनं विनिश्चित्य ।
सन्दिग्धेऽर्थे साक्षिणमङ्गीकुरुते प्रमाणतया ॥४१॥
न च भगवतोऽस्ति किञ्चन वञ्चनवचने निमित्तमित्युक्तम् ।
जिनवचनं पुनरेतन्निश्चितमाप्तोपदेशादेः ॥४२॥



Jain Education International 2010_05  For Private & Personal Use Only  www.jainelibrary.org

आप्तपरम्परया स्याद् ग्रन्थेनान्येन वचनसाम्येन ।
सन्दिग्धार्थे वचने क्वचन जिनोक्तत्वनिश्चयनम् ॥४३॥

लोकेऽपि श्लोकादौ विपश्चितः कर्तृनिश्चितिं केचित् ।
दृश्यन्ते सादृश्या[त्] कुर्वन्तो वचनपरिचित्या ॥४४॥

धर्मास्तिकायमुख्यं कथञ्चिदप्यस्तु वस्तु किं तेन ।
कृत्याकृत्यं चिन्त्यं सुचेतसा पुण्यपापादि ॥४५॥

तत्रास्ति कर्म चित्रं विचित्रफलसमुपलम्भतोऽनुमितम् ।
[३५-१] जातं हेतोः सदृशान्न दृश्यते विसदृशं कार्यम् ॥४६॥

स्याज्जातरूपजातो न राजतो जातु जातुषो वापि ।
वलयादिरलङ्कारस्तच्चित्राज्जायते चित्रम् ॥४७॥

एकजनकादिजनितौ स्त्रीपुंसौ यमलकौ प्रसाधयतः ।
भिदुरायुःसौभाग्यादिभागिनो भेदकं कर्म ॥४८॥

रजतस्थालिस्थापितनिर्मलजलजातजन्तुजातं च ।
विविधतनुजातिवर्णं वर्णयति नियामकं कर्म ॥४९॥

समेऽपि व्यापारे पुरुषयुगलस्यामलधियः
समाने कालादौ सकलगुणसाम्ये समजनि ।
यदेकस्यानर्थः प्रकटमितरस्यार्थनिचयो
विनिश्चेयं कर्म स्फुटतरमितोऽस्तीत्यनुमितेः ॥५०॥

शूरः शुचिः सुवचनोऽनुपमानुरागः
प्राज्ञः कलासु कुशलः कलितेशचित्रः(त्तः) । [३५-२]
यत्सेवको न लभते नृपतेरुदारा
तत्कर्मनिर्मितमिति ध्रुवमामनन्ति ॥५१॥

यन्नृपतेः क्षपणादपि वल्गु फलमफल्गु वल्लभं लभते ।
अधमाधमोऽपि मनुजस्तेनानुमिमीमहे कर्म ॥५२॥

दारिद्र्यं विदुषां विपन्नयवतां सम्पद्गुणद्वेषिणां
वैधव्यं च वधूजनस्य वयसि प्रोल्लासिपीनस्तने ।
यत् प्रेयोविरहः स्थितिः सह खलैरन्यस्त्विदं दारुणं
मुक्त्वा कर्म विचेतनं विकरुणं कश्चेतनश्चेष्टते ॥५३॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दौर्गत्यं यदुदात्तचित्तसुधियां व्याधिव्यथाऽभोगिनां
दौर्भाग्यं रमणीयरूपरमणीलोकस्य लक्ष्मीवताम् ।
तारुण्ये मरणं जितस्मरवपुः श्रीणां जरा श्रीमतां
नैवेदं समपत्स्यतापहृदयं कर्मा भविष्यन्न चेत् ॥५४॥
शीलं कुलमकलङ्[३६-१]कं कलाकलापातिकौशलं शौर्यम् ।
खलजन इवोपकारं निखिलं विफलयति खलु कर्म ॥५५॥
नयविनयादिविभूषितमदूषितापारपौरुषं पुरुषम् ।
कलुषमकलितमकाले समूलकाषं कषति कर्म ॥५६॥
अनुगुणेऽनुगुणं विगुणेऽन्यथा
परिजनस्वजनेष्टजनादिकम् ।
भवति कर्मणि हन्त ! शरीरिणां
नरपताविव पत्तिजनादिकम् ॥५७॥
विगुणस्य पुरस्कारं कारयता गुणवतस्तिरस्कारम् ।
द(घृ)ष्टादृष्टेनायं निवेदितो निबिडनिजजडिमा ॥५८॥ [३६-२]
किञ्चाविवादविषयो विहाय लोकायतं विषयलोलम् ।
कर्मान्ये मन्यन्ते सामान्येनाऽऽस्तिकाः सर्वे ॥५९॥
धर्माधर्मौ सुखदुःखसाधने धीधनैरभिदधाते ।
तावपि विलोकितफलौ क्वचिदिह लोकेऽपि खलु कुशलैः ॥६०॥
संयमभाजो जनजनितपूजना भाजनं जना यशसाम् ।
दृश्यन्ते द्वन्द्वद्वयवियोगिनो योगिनः सुखिनः ॥६१॥
आरम्भे संरम्भात् परिग्रहे चाऽऽग्रहा[द्] द्विधा द्वन्द्वः ।
तनुचित्तसङ्गतो वा न सङ्गतस्त्यक्तसङ्गानाम् ॥६२॥
रागादिरोगपूगापगमात् पर[३७-१]मसुखसङ्गमः सुगमः ।
आगमगदितोऽनुभवानुमानसिद्धो विशुद्धबुद्धीनाम् ॥६३॥
शमोपशमसमुत्थं समनुभवन्त्येव क्लेशतः शमिनः ।
शिवशर्म चानागतमुपागतं योगरागेण ॥६४॥
अनुमीयतेऽत एव हि रागाभावः सदुपशमातिशये ।
सद्भावनया दाह्याभाव इव हुताशनातिशये ॥६५॥
यो यस्येह विरोधी दृष्टस्तस्योदये तदितरस्य ।
भवति विनाशोऽवश्यं दाह्यस्येवानलाभ्युदये ॥६६॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञानोपशमोपचयादज्ञानानुपशमापचयदृष्ट्या ।
अ[३७-२]वधार्यते विरोधादज्ञानादेः क्षयोऽत्यन्तम् ॥६७॥
चिरकालालीनं कलधौतोपलमलमिव प्रयोगेण ।
झटिति विघटते जन्तोः कर्म ज्ञानादियोगेन ॥६८॥
पापस्यापि विलोकयन्ति लोकाः फलं दारुणं
चौराणां वधबन्धनं बहुविधं वित्तापहारादिकम् ।
जिह्वाच्छेदनभेदनान्ययशो लोके मृषाभाषिणां
नानाकारनिकारभङ्गविगमानन्याङ्गनासङ्गिनाम् ॥६९॥
सुव्यक्तफलं पापं यस्य चिकीर्षाऽपि चित्तसन्तापम् ।
कुरुते करणमकरुणं नृणां प्राणद्रविणहर[३८-१]णम् ॥७०॥
अर्हल्लक्ष्मीचूडामणिकेवलिकाज्योतिरमलशास्त्रादेः ।
संवादिनो जिनोक्तादतीन्द्रियेऽप्यागमः सत्यः ॥७१॥
एवंविधसिद्धान्तात् सर्वज्ञः साधु साध्यते साधु ।
विप्रतिपत्तौ झटिति प्रकटं कूटस्य दुर्दृशस्यापि ॥७२॥
लिङ्गागमविगमे यो यद्दतं जल्पति स वेत्ति तदवश्यम् ।
कन्थां कथयंस्तथ्यां नर इव लिङ्गागमापगमे ॥७३॥
नैवागमोऽस्त्यमूलः सम्बद्धाग्रहणतो न लिङ्गमपि ।
तथ्यमतीन्द्रियमर्थं साक्षाद्विदितं जिनो वदति ॥७४॥
धर्मं विशुद्धमधिगच्छति [३८-२] साधुबोधो
यः श्रद्धात्यविधुरो विधिना विधत्ते ।
सम्बोधयत्यबुधभव्यजनं भवाब्धे-
रुत्तारकः स करुणः स गुरुर्गुणाढ्यः ॥७५॥
यो बोद्धा श्रद्धालुः स्पृहयालुः शिवपदाय सुदयालुः ।
धर्मं गृणाति जनमनुग्रहयालुः सोऽपि गुरुरतन्द्रालुः ॥७६॥
देवागमगुरुतत्त्वं परीक्षितं पण्डितैरुपादेयम् ।
तापाद्यैरिव काञ्चनमिह वञ्चनमञ्चनमनर्थे ॥७७॥
गुरुदेवयोः स्वरूपं निरूपितं प्रक्रमागतं किमपि ।
आगमतत्त्वं प्रकृतं समासतस्तत् समाम्नातम् ॥७८॥
आगमाधि[३९-१]गमनीयमशेषं निर्दिशन्ति खलु धर्मविशेषम् ।
आगमव्यपगमे हि नियोगाज्जायते सकलधर्मविलोपः ॥७९॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आलोकेन विना लोको मार्गं नालोकते यथा ।
विनाऽऽगमेन धर्मार्थी धर्माध्वानं जनस्तथा ॥८०॥
उच्छिद्यमानो यत्नेन धर्मानुच्छेदवाञ्छया ।
आगमः सति सामर्थ्ये रक्षणीयो विचक्षणैः ॥८१॥
सन्धार्याः सपरिच्छदाः श्रुतधरा वस्त्रान्नपानादिना
लेख्यं शास्त्रसमस्तपुस्तकमहावृन्दं सदानन्दनम् ।
आत्मीयं हिमरश्मिमण्डलतले नामेव नामामलं
दत्त्वा बन्धन— —[३९-२]दिविधिना संरक्षणीयं सदा ॥८२॥
द्रविणं साधारणमुरुकरणीयमथादरेण भरणीयम् ।
पुस्तकसङ्घादीनां निमित्तमापत्तिसम्पत्तौ ॥८३॥
कुर्वाणा निर्वहणं धर्मस्यानिधनमित्थमिह धनिनः ।
बध्नन्त्यनुबन्धि शुभं निबन्धनं बन्धनविनाशे ॥८४॥
तर्कव्याकरणाद्या विद्या न भवन्ति धर्मशास्त्राणि ।
निगदन्त्यविदितजिनमतजडमतयो जनाः केऽपि ॥८५॥
द्रव्यानुयोगः सकलानुयोगमध्ये प्रधानोऽभिदधे सुधीभिः ।
तर्कः प्रमाणं प्रणिगद्यतेऽसौ सद्धर्म[४०-१]शास्त्रं ननु दृष्टिवादः॥८६॥
गणिते धर्मकथायां चरणे द्रव्ये भवेयुरनुयोगाः ।
व्याख्यानानि चतुर्णां तुर्यो वर्यः समाख्यातः ॥८७॥
मिथ्यादृष्टिश्रुतमपि सद्दृष्टिपरिग्रहात् समीचीनम् ।
किं काञ्चनं न कम्रं रसानुविद्धं भवति ताम्रम् ॥८८॥
दीप इव शब्दविद्या परमात्मानं च दीपयत्युच्चैः ।
आत्मप्रकाशनेऽपि हि जडानि पुनरन्यशास्त्राणि ॥८९।
पङ्गुः पथि गच्छेदपि नाशब्दविशारदो नरः शास्त्रे ।
कथमप्यर्थविचारे पदमपि चतुरोऽपि सञ्चरति ॥९०॥
व्याकरणालङ्कारश्छन्दःप्रमुखं जिनोदितं मुख्यम् ।
सुगतादिमतमपि स्यात् स्यादङ्कं स्वमतमकलङ्कम् ॥९१॥
मुनिमतमपि विज्ञातं न पातकं ननु विरक्तचित्तानाम् ।
यत् सर्वं ज्ञातव्यं कर्तव्यं न त्व[४०-२]कर्तव्यम् ॥९२॥
विज्ञाय किमपि हेयं किञ्चिदुपादेयमपरमपि दूष्यम् ।
तन्निखिलं खलु लेख्यं ज्ञेयं सर्वज्ञमतविज्ञैः ॥९३॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ये लेखयन्ति सकलं सुधियोऽनुयोगं
शब्दानुशासनमशेषमलङ्कृतीश्च ।
छन्दांसि शास्त्रमपरं च परोपकार–
सम्पादनैकनिपुणाः पुरुषोत्तमास्ते ॥९४॥
ते धन्या धनिनस्त एव भुवने ते कीर्तिपात्रं परं
तेषां जन्म कृतार्थमर्थनिवहं ते चाऽऽवहन्त्वन्वहम् ।
ते जीवन्तु चिरं नराः सुचरिता जैनं शुभं शासनं
ये मज्जद्गुरुदुःषमाम्बुधिपयस्यभ्युद्धरन्ति स्थिराः ॥९५॥
किं किं तैर्न कृतं न किं विवपितं दानं प्रदत्तं न किं
के वाऽऽपन्न निवारिता तनुमतां मोहार्णवे मज्जताम् ।
नो पुण्यं किमुपार्जितं किमु यशस्तारं न वि[४१–१]स्तारितं
सत्कल्याणकलापकारणमिदं यैः शासनं लेखितम् ॥९६॥
निक्षिप्ता वसतौ सती क्षितिपतेः सम्पत्प्रमोदास्पदं
भाण्डागारितमामरं स्थिरतरं श्रेष्ठं गरिष्ठं पदम् ।
सत्यङ्कारितमक्षयं शिवसुखं दुःखाय दत्तं जलं
धन्यैस्तैः स्वधनैरलेखि निखिलं यैर्वाङ्मयं निर्मलम् ॥९७॥

॥ पञ्चमोऽवसरोऽवसितः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## षष्ठोऽवसरः

सङ्घोऽनघः स्फुरदनर्घगुणौ[घ]रत्न-
रत्नाकरो हितकरश्च शरीरभाजाम् ।
निःशेषतीर्थकरमुख्यमुनीन्द्रमान्यः
पूज्यो गुरुस्त्रिभुवनेऽपि[४१-२] समोऽस्य नान्यः ॥१॥
श्रीसङ्घतः स भवतीति कृतज्ञभावात्
पूज्यं ममापरजनाः परिपूजयन्तु ।
कार्यं विनाऽपि विनयो गुरुणाऽपि कार्यः
प्रख्यापयन्निति जिनोऽपि नमस्यतीमम् ॥२॥
क्लेशापहं सपदि सुन्दरनामधेयं
स्मृत्याऽप्यमुष्य परिपुष्यति भागधेयम् ।
आलापमात्रमपि लुम्पति पातकानि
कां योग्यतां तनुमतां तनुते न योगः ॥३॥
श्रीसङ्घे परिपूजिते किमु न यत् सम्पूजितं पूजकै-
रेतस्मिन् गृहमागते किमु न यत् कल्याणमभ्यागतम् ।
एतत्पादसरोजरा[४२-१]जिरजसा पुंसां समारोहता
मूर्द्धानं प्रविधीयते यदधिको शुद्धिस्तदत्राद्भुतम् ॥४॥
यत् किञ्चनापि सङ्घे नियोजितं वितनुते विशिष्टफल[म्] ।
तोयमिव शुक्तिसम्पुटपतितं मुक्ताफलं विमलम् ॥५॥
अनघे सङ्घे क्षेत्रे श्रद्धाजलसिक्तमुप्तमल्पमपि ।
जनयति फलं विशालं विटपिनमिव वटतरोर्बीजम् ॥६॥
वित्तं वितीर्णं विस्तीर्णे पवित्रे पात्रसत्तमे ।
सङ्घे सञ्जायतेऽनन्तं न्यस्तमर्णं इवार्णवे ॥७॥
समस्तः पूजितः सङ्घः एकदेशेऽपि पूजिते ।
विन्यस्तमस्तके[४२-२] पुष्पे पूज्यो जायेत पूजितः ॥८॥
गजव्रजस्येव दिशागजेन्द्राः
सङ्घस्य मुख्यास्तु मता मुनीन्द्राः ।
तेभ्यः प्रदानं विधिना निदानं
निर्वाणपर्यन्तसुखावलीनाम् ॥९॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

साधवो जङ्गमं तीर्थं जल्पज्ञानं च साधवः ।
साधवो देवता मूर्ताः साधुभ्यः साधु नापरम् ॥१०॥
तीर्थं ज्ञानं देवता नोपकुर्यात्
सत्त्वानित्थं साधुसार्थो यथोच्चैः ।
धर्माधर्मप्रेरणावारणाभ्या–
मर्थानर्थौ साधयन् बाधयंश्च ॥११॥
साधूपदेशतः सर्वो धर्ममार्गः प्रवर्तते ।
विना तु साधुभिः सर्वा तद्वार्ताऽपि निवर्तते ॥१२॥
चारित्रं दर्शनं ज्ञानं मुनिभ्यो नापरं मतम् ।
त्रयाच्च नापरं पूज्यं कथं पू[ज्याः] न [४३–१] साधवः ॥१३॥
क्वचित् त्रयं द्वयं क्वापि दर्शनार्थोद्यमः क्वचित् ।
प्रायो न निर्गुणो लिङ्गी स्तुत्यः सर्वस्ततः सताम् ॥१४॥
चित्रेऽपि लिखितो लिङ्गी वन्दनीयो विपश्चिताम् ।
निश्चितं किं पुनश्चित्तं दधानो जिनशासने ॥१५॥
नानारूपाणि कर्माणि विचित्राश्चित्तवृत्तयः ।
आत्मनीनं जनः कोऽपि कथञ्चन करोत्यतः ॥१६॥
तस्मान्महान्तो गु[४३–२]णमाददन्तां
दोषानशेषानपि सन्त्यजन्तु ।
गृह्णन्ति दुग्धं जलमुत्सृजन्ति
हंसाः स्वभावः स निजः शुचीनाम् ॥१७॥
गृह्णन्नामापि नामेह कुर्वन्नामादि किं पुनः ।
जिनस्य मन्ये मान्यः स्यात् तद्भक्तानां स्वभावतः ॥१८॥
लेखवाहोऽपि भूपस्य भक्तियुक्तैर्नियुक्तकैः ।
मान्यते निर्गुणोऽप्येवं लिङ्गी जिनमताश्रितैः ॥१९॥
सर्वज्ञो हृदये यस्य वाचि सामायिकं करे ।
धर्मध्वजो जगज्ज्येष्ठो ग्रामणीर्गुणिनामसौ ॥२०॥
न सन्ति येषु देशेषु साधवो धर्मदीपकाः ।
नामापि तेषु धर्म[४४–१]स्य ज्ञायते न कुतः क्रिया ॥२१॥
धर्मं कुर्वन्ति रक्षन्ति वर्धयन्ति सुमेधसः ।
कथं न वन्द्या विश्वस्य साधवो धर्मवेधसः ॥२२॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

करणकारणसम्मतिभिस्त्रिधा
वचनकायमनोभिरुपार्जयन् ।
कथमपीह शुभं शुभचेतसां
मुनिजनोऽजनि पूजनभाजनम् ॥२३॥

ज्यायः पात्रं श्रेयश्चित्तं स्वायत्तं सद्गेहे वित्तम् ।
एतल्लभ्य पुण्यैः पूर्णं मुक्तिप्राप्तेर्यानं तूर्णम् ॥२४॥

ज्ञानोत्तमं किमपि किञ्चन दर्शनाढ्यं
पात्रं पवित्रितजगत्त्रयसच्चरित्रम् ।
किञ्चित् त्रयोगुणमयं द्विगुणं समग्रैः
यु[४४–२]क्तं गुणैः किमपि पूज्यमशेषमेव ॥२५॥

मिथ्यात्वध्वान्तविध्वंसे पटीयांसो महौजसः ।
सद्वृत्ताः कस्य नो पूज्याः स्युः सूर्या इव सूरयः ॥२६॥

तारका इव भूयांसः स्वप्रकाशकरा नराः ।
प्रकाशयन्तस्तत्त्वानि दुर्लभा भास्करा इव ॥२७॥

किञ्चित्प्रकाशपटवो बहवोऽपि पापाः
सन्तापका हुतवहा इव सन्ति लोके ।
लोकम्प्रि(म्पृ ?)णाः प्रकटिताखिलवस्तुतत्त्वाः
सत्त्वाधिकाः शशधरा इव पुण्यलभ्याः ॥२८॥

उज्जासयन्तो जाड्यस्य पदार्थानां प्रकाशकाः ।
भास्क[४५–१]रा इव दुष्प्रापाः साधवो विश्वपावनाः ॥२९॥

निःशेषनिर्मलगुणान्तरसारहेतौ
संसारसागरसमुत्तरणैकसेतौ ।
ज्ञाने यतेः सति सतामतिपूजनीये
दौर्जन्यमन्यगुणवीक्षणमेव मन्ये ॥३०॥

आलोकेनैव सन्तापं हरन्तोऽतिमनोहराः ।
बुधप्रिया विलोक्यन्ते क्वापि पुण्यैः सितांशुकाः ॥३१॥

ज्ञानाधिको वरतरः स्वपरोपकारी
मुक्तक्रियोऽपि मतमुन्नमयन् महात्मा ।
सुष्ठुव्रतोऽपि करणेन तु शास्त्रशून्यः
स्वार्थेऽपि यः कुशलतावि[४५–२]कलो वराकः ॥३२॥

५

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जैनं प्रभावयति शासनमङ्गिसार्थं
    यो बोधयत्यनुपमः कृपया परीतः ।
त्यक्तक्रियः कथमसौ न कथं तपस्वी
    स्वाध्यायतो न हि तपोऽस्त्यधिकं न कृत्यम् ॥३३॥
स(अ)ज्ञानि(न)तो मूर्खमतीव साधुं
    यः कष्टचेष्टानिरतं स्तुवीत ।
मार्गज्ञमन्धं स वदेत् सुदृष्टेः
    समः समाने हि समेति रागम् ॥३४॥
एनांसि योंऽह्रिरजसाऽपि निहन्ति वाचा
    मोहं व्यपोहति दृशाऽपि पुनः पुनाति ।
सङ्गेन दुःखमपनीय तनोति सौख्यं
    ज्ञानी सतां स महनीयमहानुभावः ॥३५॥
[४६–१] ज्ञाने सति भवत्येव दर्शनं सहभावतः ।
तेनोभयमिदं पूज्यं विभागस्तु विशेषतः ॥३६॥
शुश्रूषा धर्मरागो जिनगुरुजनयोः पूजनाद्याभियोगः
    संवेगो निर्विदुच्चैरसमशमकृपाऽऽस्तिक्यलिङ्गानि येषाम् ।
शङ्काकाङ्क्षाद्यभावो जिनवचनरते धार्मिके बन्धुबुद्धिः
    श्रद्धानं सप्ततत्त्व्यामिति गुणनिचयः सदृशस्तेऽपि पूज्याः ॥३७॥
दर्शनं प्रथमकारणमुक्तं
    मुक्तिधामगमने मुनिमुख्यैः ।
ज्ञानमत्र सति तावदवश्यं
    सम्भवेदपि न वा चरणं तु ॥३८॥
इदमशे[४६–२]षगुणान्तरसाधनं
    सकलसौख्यनिधानमबाधनम् ।
कुगतिसङ्गतिनिश्चितवारणं
    निखिलदारुणदूषणदारणम् ॥३९॥
अपगतोऽपि मुनिश्चरणाद् दृशि
    स्थिरतरः सुतरां परिपूज्यते ।
शुभमतेर्महतां बहुमानतः
    परिणतिश्चरणेऽपि भवेदिति ॥४०॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

साधुश्चारित्रहीनोऽपि समानो नान्यसाधुभिः ।
भग्नोऽपि शातकुम्भस्य कुम्भो मृद्घटकैरिव ॥४१॥
यद्यऽद्य दुःषमादोषादनुष्ठानं न दृश्यते ।
केषाञ्चिद् भावचारित्रं तथापि न विहन्यते ॥४२॥
सातिचारचरित्राश्च काले[४७-१]ऽत्र किल साधवः ।
कथितास्तीर्थनाथेन तत् तथ्यं कथमन्यथा ॥४३॥
कालादिदोषात् केषाञ्चिद व्यलीकानि विलोक्य ये ।
सर्वत्र कुर्वतेऽनास्थामात्मानं वञ्चयन्ति ते ॥४४॥
वहन्ति चेतसा द्वेषं वाचा गृह्णन्ति दूषणम् ।
अनम्रकायाः साधूनां पापिनो दर्शनद्विषः ॥४५॥
इहैव निन्द्याः शिष्टानां मृता गच्छन्ति दुर्गतिम् ।
निर्वर्तयन्ति संसारमनन्तं क्लिष्टमानसाः ॥४६॥
इदं विचिन्त्यातिविविक्तचेतसा
यमेव किञ्चिद गुणमल्पमञ्जसा ।
विलोक्य साधुं बहुमा[४७-२]नतः सुधीः
प्रपूजयेत् पूर्णमिवाखिलैर्गुणैः ॥४७॥
तथा लभेताविकलं जनः फलं
निजाद विशुद्धात् परिणामतः स्फुटम् ।
अभीष्टमेतत् प्रतिमादिपूजने
फलं समारोपसमर्पितं सताम् ॥४८॥
काष्ठोपलादिं गुरुदेवबुद्ध्या
ये पूजयन्त्यत्र विशिष्टभावाः ।
ते प्राप्नुवन्त्येव फलानि नूनं
भावो विशुद्धः फलसिद्धिहेतुः ॥४९॥
कालोचितं साधुजनं त्यजन्तो
मार्गन्ति येऽन्यं कुधियः सुसाधुम् ।
दानादिपात्रं द्वितयाद विहीना-
स्ते दुर्गतिं यान्ति हि दुर्दुरूढाः ॥५०॥
[४८-१]वस्त्रादिदानमात्रेऽपि पात्रापात्रपरीक्षणम् ।
क्षुद्राः कुर्वन्ति यत् केचित् तत् कार्पण्यस्य लक्षणम् ॥५१॥

Jain Education International 2010_05    For Private & Personal Use Only    www.jainelibrary.org

गेहे समागते साधावौषधादिसमीहया ।
अवज्ञा क्रियते यत्तु पातकं किमतः परम् ॥५२॥

अन्यत्रापि सधर्मचारिणि जने मान्ये विशेषान्मुनौ
दृष्टे साधुनिधाविवापनिधने बन्धाविवातिप्रिये ।
यस्योल्लासिविकासहाससुभगे स्यातां न नेत्राऽऽनने
दूरे तस्य जिनो वचोऽपि हृदये जैनं न सन्तिष्ठते ॥५३॥

विलोक्य साधुलोकं यो विकासितविलोकनः । [४८-२]
अमन्दानन्दसन्दोहः स्यात् स देही सुदर्शनः ॥५४॥

इदं दर्शनसर्वस्वमिदं दर्शनजीवितम् ।
प्रधानं दर्शनस्येदं वात्सल्यं यत् सधार्मिके ॥५५॥

येषां तीर्थकरेषु भक्तिरतुला पापे जुगुप्सा परा
दाक्षिण्यं समुदारता शममतिः सत्योपकारे रतिः ।
ते सद्धर्ममहाभरैकधवलाः पोता भवाम्भोनिधौ
भव्यानां पततां पवित्रितधराः पात्रं परं सद्दृशः ॥५६॥

चारित्रिणस्तृणमणी गणयन्ति तुल्यं
पश्यन्ति मित्रमिव शत्रुमरागरोषाः ।
किं भूयसा निजवपु[४९-१]ष्यपि निर्ममत्वा
ये ते परं त्रिभुवनार्चितमत्र पात्रम् ॥५७॥

ये नित्यं प्राणिरक्षाप्रणिहितमतयोऽसत्यसन्त्यागयुक्ता-
स्त्यक्तस्तेया मृगाक्षीमुखसुखविमुखा मुक्तमुक्तादिमूर्च्छाः ।
मूर्ता धर्मा इवैते जितमदमदना मन्दिरं मन्दरागाः ।
पादीयै[1] पांशुपातैरिह यतिपतयः पुण्यभाजां पुनन्ति ॥५८॥

त्रिभुवनमिदं व्याप्तं चित्रैश्चराचरजन्तुभिः
स्वभरणपरैः पीडां कर्तुं परस्य सदोद्यतैः ।
तदपि[४९-२] न तनुत्यागेऽप्यन्यं हिनस्ति कदाऽपि यः
कथमिव मुनिर्मान्यो न स्यात् स देव इवापरः ॥५९॥

लोभक्रोधाद्यैः प्राणनाशेऽप्यसत्यं
ये नो भाषन्तेऽशेषभाषाविधिज्ञाः ।
लोकातिक्रान्तैकान्तकान्तोरुसत्त्वाः
सत्त्वांस्ते वाचाऽप्येनसो वञ्चयन्ति ॥६०॥

१ पादानामिमे पादीयाः तैः चरणसत्कैरित्यर्थः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

निपतितमपि किञ्चित् काञ्चनाद्यन्यदीयं
विषविषधरकल्पं कल्पयन्त्यप्यनल्पम् ।
विजितविषमलोभा ये जगज्जातशोभा
गृहमिह शुभभाजां ते भजन्ते यतीन्द्राः ॥६१॥
रामाणां नयने पयोजजयिनी लोले पयोबुद्बु[५०-१]दौ
सत्कान्ती कलशोपमौ घनकुचौ पीनौ च मांसार्बुदौ ।
वक्त्रं पूर्णशशाङ्ककान्ति कलयेच्चर्मावृतं कैकसं
यः सद्भावनया सतां स भुवने वन्द्योऽवनीपावनः ॥६२॥
ललितललनालीलालापैर्विलोलविलोकितै-
रलसचलितैश्चित्राकारैर्विलासविचेष्टितैः ।
न हरति म(य)तेर्यस्यालोके मनागपि मा[५०-२]नसं
मनुजवपुषा मन्ये देवः स मान्यशिरोमणिः ॥६३॥
विषधरशिरोरत्नं यत्नं विनाऽऽददते बला-
दरिबलमपि प्रौढं बाढं जयन्ति महौजसः ।
जगति मनुजा ये विक्रान्ता विषोढुमहो क्षमाः
क्षणमपि न तेऽप्येणाक्षीणां कटाक्षनिरीक्षणम् ॥६४॥
ते शूरास्ते शरण्या रिपुशरविसरस्तैरपास्तः समस्त-
स्तैः[५१-१] सम्प्राप्ता जयश्रीः सपदि दशदिशाः शोभितास्तैर्यशोभिः ।
ते कल्याणैकपात्रं त्रिभुवनजयिनः सुभ्रुवां दृष्टिपाता
बाणव्राता निशाता मदननरपतेर्यन्मनो नाऽऽक्षिपन्ति ॥६५॥
अह्नाय वह्नौ बहवो विशन्ति
शस्त्रैः स्वदेहानि विदारयन्ति ।
कृच्छ्राणि चित्राणि समाचरन्ति
माराविवीरं विरला जयन्ति ॥६६॥
कलयति कलाः साकल्येनाकलङ्ककलेवरा
वदति विशदं वादे विद्याः प्रवेत्ति मनोवराः ।
रचयतितरां दिव्यं काव्यं न किञ्चन कौतुकं
तुद[५१-२]ति मदनं चेत् तारुण्ये तदेतदलौकिकम् ॥६७॥
निर्जिताः शत्रवस्तेन साध्यार्थास्तेन साधिताः ।
प्राप्तव्यं तेन सम्प्राप्तं मथितो येन मन्मथः ॥६८॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

हरिहरप्रमुखं ससुरासुरं जितवतः स्वभुजैर्भुवनत्रयम् ।
विजयिनं मदनस्य मदच्छिदं नमति कः सुमतिर्न मुनीश्वरम् ॥६९॥

न वीतरागादपरोऽस्ति देवो
न ब्रह्मचर्यादपरं तपोस्ति ।
नाभीतिदानात् परमस्ति दानं
चारित्रिणो नापरमस्ति पात्रम् ॥७०॥

परिग्रहमहाग्रहैः परिगृहीतधीविग्रहा
विदन्ति न गुणागुणौ[५२-१] न गुरुदेवते मन्वते ।
अकृत्यमपि कुर्वते परिहरन्ति कृत्यं नरा
[1]भ्रमन्तकि न शेरते न च रतिं लभन्ते क्वचित् ॥७१॥

निदानं दैन्यस्य प्रचुरतरचिन्ताहुतभुजः
प्रभूतैनोराशिः शमतरुसमुच्छेदपरशुः ।
परं क्लेशस्थानं परिभवपदं किञ्चिदपरं
विपत्तेरुत्पत्तिर्भवति भविनां सङ्ग्रहरसः ॥७२॥

रचयति प्रचुरं रुचिरं चिरं
चटु पटु प्रकटं कटुकं वचः ।
प्रसहते हसति प्रहतो नरो
नरपतेरिति लोभविजृम्भितम् ।७३॥

प्रनि(णि)न्धः सद्विद्यो विदितपरमार्थोऽपि पुरुषः [५२-२]
पुरस्तात् पापानां परुषवचनानां क्षितिभुजाम् ।
विभो देवेत्याद्यं वचनमतिदीनं प्रतिदिनं
वदत्युच्चैर्यत्तद्विलसति खलो लोभहतकः॥७४॥

विश्वं येन वशीकृतं कृतधियोऽकृत्ये कृताः सोद्यमा
भाण्डाद्या विकृतीः कृतीर्नटभटाश्चित्राकृतीः कारिताः ।
तं निर्जित्य परिग्रहग्रहमहो ध्यानादिके तद्धना
ये धन्यस्य(?) तपोधना गुणधना धामानि तेऽध्यासते ॥७५॥

इष्टं द्वेष्टि गुणाधिकं न गणयेन्मान्यं न वा मन्यते
वन्द्यं निन्दति नाभिनन्दति जनो येषां कृते[५३-१] नन्दनम् ।
स्वाधीनानि धनानि तानि सुधियः सन्त्यज्य ये तस्थिरे
मुक्त्यर्थं मुनिपुङ्गवाः सुकृतिनां गच्छन्ति ते मन्दिरे ॥७६॥

---

१ स्वार्थिककप्रत्ययान्तमिदं रूपम् । भ्रमन्ति त्यर्थः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

निमग्नलोकं गुरुलोभसागरं
तरन्ति सन्तोषतरण्डकेन ये ।
न पादपद्मैरिह सद्म निःस्पृहाः
स्पृशन्ति ते पातकिनां तपोधनाः ॥७७॥

अत्युद्भटलोभभटं जितभुवनं दुर्जयं ये जयन्ति ।
ते महतां महनीया महानुभावा भुवि भवन्ति ॥७८॥

सदाभ्यस्तां प्रौढां मुनिपरि[५३-२]वृढां बाढमाहारसंज्ञां
प्रतिक्षिप्य क्षिप्रं क्षपितविषमद्वेषरागारिपक्षाः ।
तपोभिर्ये चित्रैश्चिरमुपचितं कर्म निर्मूलयन्ति
प्रधानं ते ध्यानामलिनमनसो भाजनं पूजनस्य ॥७९॥

तनीयांसस्तीव्रै रुचिरवनिताः सत्तपोभिर्विचित्रै-
श्चमत्कारं चित्ते विदधति सतां वल्लभा दुर्लभा ये ।
महात्मानो मान्या नरसुमनसां शान्तचित्ता निशान्तं
नितान्तं कल्याणा निधय इव ते पुण्यभाजां[५४-१] भजन्ते ॥८०॥

एवंविधानि पात्राणि पवित्रितजगन्त्यहो ।
कियन्ति सन्ति लोकेऽत्र कियन्तः कल्पपादपाः ॥८१॥

विशति कामदुघा सुरभी शुभा
सदसि रोहति कल्पमहीरुहः ।
भवति नात्र परत्र शुभावहो
बहुभवस्य सुपात्रसमागमः ॥८२॥

प्रायोऽस्ति नैकगुणमात्रममत्रमत्र
द्वित्रैर्गुणैरनुगतं नितरां दुरापम् ।
मत्वेति पात्रमुपलभ्य विचक्षणानां
नोपेक्षणं क्षणमपि क्षमते क्षमाणाम् ॥८३॥

यतिपतिभिरसङ्गैः सङ्गतिः पुण्यलभ्या
परिणतिरपि दा[५४-२]ने दुर्लभा मन्दभाग्यैः ।
रुचितमुचितमुच्चैर्वस्तु देयं दुरापं
त्रितयमिदमुदारैः कोऽप्यवाप्नोति पुण्यैः ॥८४॥

---

१. अमत्रम् पात्रम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्राप्तेऽपि पात्रे सुलभं न वित्तं
वित्तेऽपि पुण्यैः पुनरेति चित्तम् ।
दाने त्रयं कोऽपि भवाब्धिसेतुं
प्राप्नोति कल्याणकलापहेतुम् ॥८५॥

दुरापमिदमुच्चकैस्त्रयमवाप्य पुण्योदयाद्
विधत्त सफलं जना न हि विलम्बितुं सङ्गतम् ।
विलोक्य मुनिराकुलं विमलधीर्निधानं परं
विधानसहितो हि तं बत विलम्बते कोऽपि किम् ॥८६॥

दायादा आददन्ते[५५-१] दहति हुतवहोऽम्बुप्लवाः प्लावयन्ते
स्तेना मुष्णन्ति भूपोऽपहरति रटतां मोटयित्वा कृकाटिम् ।
मूढानां याति बाढं धनमिति निधनं धीधना धीरधन्याः
साधूनामर्थयित्वाऽस्खलितमगलितं पालितं भुञ्जतेऽग्रे ॥८७॥

नियोगेनायोगो भवति विभवैश्चेद् विभविनां
विना किञ्चित् कार्यं रचितपरितापः परवशः ।
वरं धर्मायासौ विमलयशसे तोषितपरः
प्रमोदाय स्वस्य स्ववशविहितः[५५-२] साधितहितः ॥८८॥

अनन्तगुणमक्षतं भवति रक्षितं साधुभिः
सुपात्रविनियोजितं ननु परत्र धर्मार्थिनाम् ।
प्रयाति निधनं धनं सदनसञ्चितं निश्चितं
तथापि न धनप्रिया ददति मोहराजो बली ॥८९॥

ददति सति कदाचिन्मूलनाशेऽपि लोभा-
दिह हि शतसहस्रं लाभसम्भावनायाम् ।
ध्रुवबहुगुणलाभे नो परत्रार्थनाथा
जयति जनसमूहं मोहयन् मोहमल्लः ॥९०॥

भोगारम्भपरिग्रहा[५६-१]ग्रहवतां शीलं तपो भावनाः
दुःसाधा गृहमेधिनां धनवतां दानं सुदानं पुनः ।
यस्तत्रापि निरुद्यमो द्रमकधी रौद्रं समुद्रोपमं
संसारं स कुतस्तरिष्यति बतोपायादपायाकुलम् ॥९१॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रकृतिचपलं पुंसां चित्तं प्रगच्छदितस्ततः
कथमपि यदा पुण्यैर्जातं विहायितसम्मुखम् ।
भवति न तदा कालक्षेपः क्षमो विदुषामहो
पुनरपि भवेत् तादृग् नो वा चलं सकलं यतः ॥९२॥

प्राप्ते त्रये ये गमयन्ति कालं
ते वेगगच्छत्तरिकाधिरूढाः ।
मूढा ग्रहीतुं प्रतिपातयन्ते
रत्नाकरे रत्नमयत्न[५६–२]दृष्टम् ॥९३॥

भव्यं वासः श्लाघनीयो निवासः
शय्या वर्या प्राज्यभोज्यं शुभाज्यम् ।
पात्रं पानं भैषजादि प्रधानं
भक्त्या देयं साधुसङ्घाय देयम् ॥९४॥

यदात्मनोऽतिवल्लभं जगत्यतीव दुर्लभम् ।
तदेव भक्तिभाजनैः प्रदेयमार्हतैर्जनैः ॥९५॥

धर्मकार्येऽपि ये व्याजं कुर्वते वित्ततत्पराः ।
आत्मानं वञ्चयन्त्युच्चैस्ते नरा मूर्खशेखराः ॥९६॥

भो जना भोजनं यावन्न न्यस्तं साधुभाजने ।
समग्रमग्रतस्तावद् भुज्यते स्वेच्छया कथम् ॥९७॥

निक्षिप्तमक्षते पात्रे विविक्ते गुप्तिशालिनि ।
कल्पते निर्विक[५७–१]ल्पं स्वं काले भोगाय भोगिनाम् ॥९८॥

तीर्थस्य मूलं मुनयो भवन्ति
मूलं मुनीनामशनाऽऽसनादि ।
यच्छन्निदं धारयतीह तीर्थं
तद्धारणं पुण्यपदं वरेण्यम् ॥९९॥

तीर्थे यद् भव्या भवजलनिधेरुत्तरीतुं तरण्डं
सम्यक्त्वं केचिद् विरतिमपरे देशतः सर्वतोऽन्ये ।
अङ्गीकुर्वाणाः कुशलमतुलं कुर्वते कारयन्ते
तत् स्यान्निःशेषं शुभपरिणतेस्तीर्थनिर्वाहकस्य ॥१००॥



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इह हि गृहिणां निर्वाणाङ्गं विहाय विहायितं
जिनपरिवृढैः प्रौढं बाढं परं परिकीर्तितम् ।
न खलु पदतो मुख्येऽमु[५७–२]ष्मिन्नतीव कृतादरैः
क्रातभिरनिशं भव्या भाव्यं भवाब्धितितीर्षया ॥१०१॥

ग्लानादीनां पुनरवसर सीदतां क्वापि बाढं
यन्नादेयं स्वयमुरुतरं दापनीयाः परेऽपि ।
काले दत्तं विपुलफलदं येन सम्पद्यतेऽदः
सद्धान्यानामिव जलधरैः शुष्यतां मुक्तमम्भः ॥१०२॥

प्रत्तं विपत्तावुपकारि किञ्चित्
सम्पद्यते जीवितकल्पमल्पम् ।
पुंसः पिपासोः सुतरां मुमूर्षो-
रानीय पानीयमिवोपनीतम् ॥१०३॥

कालेन ता एव पदार्थमात्राः
प्रायः क्रियन्तेऽसुमता महार्घाः ।
स्वात्यामिवापोऽ[५८–१]पि पयोदमुक्ताः
स्थूलामलाः शुक्तिमुखेषु मुक्ताः ॥१०४॥

प्रस्तावमासाद्य सुखाय सद्यः
सम्पद्यते दुःखकरः पदार्थः ।
यूनां मदायेन्दुरिव प्रियाभि-
र्योगे वियोगे परितापहेतुः ॥१०५॥

यद्यन्यदा न क्रियते तथापि
व्यापत्सु कार्यं गुरुणाऽऽदरेण ।
अन्नादिदानं महते फलाय
कोऽल्पेन नानल्पमुपाददीत ॥१०६॥

इदं विमलमानसो विपुलसम्पदामास्पदं
पदं च यशसां परं परमपुण्यसम्पादकम् ।
मुनीन्द्रजनपूजनं जनितसज्जनानन्दनं
विधाय विधिनाऽधुनाऽप्यवधुनाति ध[५८–२]न्योऽघमम् ॥१०७॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दीनादीनामपि करुणया देयमौदार्ययुक्तै-
 युक्तं दानं स्वयमपि यथा तीर्थनाथैर्वितीर्णम् ।
पात्रापात्रापरिगणनया प्राणिनां प्रीणनाय
 स्यात् कारुण्यं कथमितरथा धर्मसर्वस्वकल्पम् ॥१०८॥

अत्रैव जन्मनि जनः सुभगम्भविष्णु-
 राढ्यम्भविष्णुरपरत्र परोपकारी ।
कश्चित् कृती च सुकृती च कृतार्थजन्मा
 दानं ददाति विपुलं पुलकाञ्चिताङ्गः ॥१०९॥

॥ षष्ठोऽवसरोऽवसितः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

## सप्तमोऽवसरः

जिनागमं येऽनधिगम्य सम्यग्
गम्भीर[५९-१]मात्मम्भरयो वराकाः ।
दानं निषेधन्ति वचो न कर्णे
कर्णेजपानां करणीयमेषाम् ॥१॥

नो जानन्ति जिनागमं जडधियो नो सौगताद्यागमं
नो लोकस्थितिमुज्ज्वलामृजुमहो व्यामोहयन्तोऽन्वहम् ।
दातॄणामथ गृह्णतामसुमतां कृत्वाऽन्तरायं तरां
मिथ्यादेशनया नयन्ति नरकं लोकं व्रजन्ति स्वयम् ॥२॥

महानुभावा भवमुत्तरीतुं
प्राणैरपि प्राणिगणोपकारम् ।
कुर्वन्ति केचित् करुणार्द्रचित्ता-
श्चन्द्रा इवाह्लादितजीवलोकाः ॥३॥

अन्ये शुचैव परितापितविश्वविश्वा
वैश्वानरा इ[५९-२]व नरा निरये रयेण ।
गन्तुं ह्यपकृतयो कथयन्ति मिथ्या
किं कुर्महे वयमहो विषमो हि मोहः ॥४॥

तथापि किञ्चित् कथयामि युक्तं
मध्यस्थलोकस्य स्वल्पयुक्तम् ।
मोहव्यपोहाय विहाय कृत्यं
स्वार्थात् परार्थो महतां महिष्ठः ॥५॥

यावद्वर्षं ननु जिनवृषा वर्षति स्वर्णवर्षं
हर्षोत्कर्षं प्रणयिशिखिनां कुर्वदुर्वीगतानाम् ।
नो सन्दिग्धं न च विरचितं केनचिन्मादृशेदं
प्रोक्तं प्रोच्चैरविचलवचो विश्रुतैः श्रीश्रुतज्ञैः ॥६॥

निष्क्रान्तिकाले सकला जिनेन्द्रा
यादृच्छिकं दा[६०-१]नमतुच्छवाञ्छाः ।
यच्छन्ति विच्छिन्नदरिद्रभावं
मेघा इवाम्भो भुवि निर्विशेषम् ॥७॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दिशन्त्येते मोहान्न खलु निखिलेभ्यः स्वविभवं
[भव]न्तो विज्ञानैस्त्रिभिरपतितैस्तीर्थपतयः ।
भवे पूर्वेऽभ्यस्तैरनुगतधियो नाऽप्यकुशलं
प्रवृत्तेः कर्मास्याः किमपि कथितं कारणमिह ॥८॥

किन्तु दानान्तरायस्य कर्मणोऽपचये सति ।
क्षायोपशमिके भावे दानमुक्तं जिनागमे ॥९॥
अथापि तीर्थकृन्नामनामकर्मोदयादयम् ।
दयाकरो महास[६०-२]त्वः सर्वसत्त्वोपकारकः ॥१०॥
प्रदेशने प्रवर्तेत देशनायामिवानिशम् ।
प्रशस्यते तथापीदं देशनेव प्रदेशनम् ॥११॥

नाशुभस्य फलं दानं निदानं वा निदर्शितम् ।
कर्मणः क्वापि सिद्धान्ते दीयमानं विधानतः ॥१२॥

शुभे कृत्ये कृते पूर्वैः सर्वैः सर्वार्थवेदिभिः ।
प्रवर्तितव्यमन्येन मन्ये न्यायः सतां मतः ॥१३॥

वचोऽप्यशेषमेतेषां प्रमाणीक्रियते बुधैः ।
विशिष्टा किं पुनश्चेष्टा दृष्टादृष्टाविरोधिनी ॥१४॥
यथा त[६१-१]पस्तथा शीलं तीर्थनाथैरनुष्ठितम् ।
तथा दानमपि श्रेष्ठमनुष्ठेयमनुष्ठितम् ॥१५॥

निष्क्रान्तोऽपि त्रिभुवनविभुर्वर्धमानाभिधानो
वस्त्रस्यार्द्धं सदयहृदयोऽतुल्यमूल्यं द्विजाय ।
यच्छन्नेवं कथयति सदा निर्गुणस्यापि दातुं
युक्तं शक्त्या किमुत गुणिनां साधुसाधर्मिकाणाम् ॥१६॥
दानं निदानं यदि पातकानां
सम्पद्यते नैव तदा मुनीन्द्रः ।
दद्यादनिन्द्यो निरवद्यविद्या-
चतुष्टयाध्यासितसच्चरित्रः ॥१७॥
अयुक्ते न प्रवर्तन्ते मर्त्यनाथास्तथाविधाः ।
रागद्वेषप्रमादादि[६१-२]विमुक्ता मुक्तिसम्मुखाः ॥१८॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नाप्युत्तरारम्भभवोऽपि दोषो
दातुर्भवेन्निश्चितमत्र कश्चित् ।
परोपकाराय दयापरस्य
प्रवर्तमानस्य शुभाशयस्य ॥१९॥
अन्यथा हि महादानं महारम्भनिबन्धनम् ।
न दद्युर्धीधना धन्या विकीर्यानिधनं धनम् ॥२०॥
एष्टव्यमित्थमेवेदं गुर्वादेरपि नान्यथा ।
अन्नादि देयं व्याध्यादेः कदाचित् स्याद्विधायकम् ॥२१॥
प्रत्तं प्रबन्धेन गिरा गुरूणां
साधर्मिकेभ्यो भरतेन दानम् ।
अन्यैश्च धन्यैर्धनसार्थवाह-
मुख्यैः प्रभूतैः समयप्रसिद्धैः ॥२२॥
कल्याणहेतुस्त[६२-१]दभूदमीषां
नानर्थसम्पादि निरर्थकं वा ।
तीर्थाधिनाथप्रथमान्नदानं
दातुः शिवस्य प्रथितं निदानम् ॥२३॥
मुख्यं च धर्मस्य चतुर्विधस्य
प्रोक्तं जिनेन्द्रैः समये समस्ते ।
तीर्थान्तरीयैः कथितं विशिष्टं
दानं जनानां नितरामभीष्टम् ॥२४॥
बाह्यं नयं च बाह्यानां कारणं दानवारणे ।
अमीषां दृश्यते नूनं क्लिष्टादृष्टं भविष्यति ॥२५॥
स्वयं च सर्वं गृह्णन्ति गृद्धा गृध्रा इवाऽऽमिषम् ।
कयापि भङ्ग्या निर्भाग्या भङ्गमन्यस्य कुर्वते ॥२६॥
परो व्यामोह्यते येन गम्यते दुर्गतिः [६२-२] स्वयं ।
क्रियते शासनोच्छेदो धिगिदं कुलककौशलम् ॥२७॥
विज्ञप्तिः सा भवतु भविनां सा च वाचां प्रवृत्ति-
श्चेतोवृत्तिः कलिलविकला सैव सा कायशक्तिः ।
आज्ञा सैव प्रभवतु यया शक्यते संविधातुं
मोहापोहः स्वपरमनसोः शासनाभ्युन्नतिश्च ॥२८॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्नादिदानेऽथ भवेदवश्यं
प्रारम्भतः प्राणिगणोपमर्दः ।
तस्मान्निषिद्धं ननु नेति युक्तं
यूकाभयान्नो परिधानहानम् ॥२९॥

पापाय हिंसेति निवारणीया
दानं तु धर्माय ततो विधेयम् ।
दुष्टा दशानामुरगादिदष्टा
यैवाङ्गुली [६३-१] सा खलु कर्तनीया ॥३०॥

कृष्यादि कुर्वन्ति कुटुम्बहेतोः
पापानि चान्यानि समाचरन्ति ।
देवादिपूजादि विवर्जयन्ति
हिंसां भणित्वेति कथं न मूढाः ॥३१॥

सन्त्यज्य पूज्यं जननीजनादिं
ये दुष्टचेटीमिह चेष्टयन्ति ।
तेषां भवन्तोऽपि भवन्ति तुल्या
सक्ता गृहे देवगुरुंस्त्यजन्तः ॥३२॥

अथापि नारम्भवतोऽपि युक्तं
प्रारम्भणं धर्मनिमित्तमत्र ।
द्रव्यस्तवो हन्त गतोऽस्तमेवं
ध्वस्तः समस्तो गृहमेधिधर्मः ॥३३॥

द्रव्यस्तवप्रधानो धर्मो गृहमेधिनां यतोऽभिदधे ।
द्रव्यस्तवस्य विरहे भवत्यभावस्ततस्तस्य ॥३४॥

[६३-२] युक्त्यागमाननुगतं सङ्गतमुपगन्तुमीदृशं न सताम् ।
